M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 345

Title: Prayaschita Pradeepa

345

प्रायश्चित्त प्रदीपः
(आग्रयणम्)

		श्री Prayaschitta Pradeepa	Title
		(Agrayana)	Author
			Editor
			Year, Vols.
			Publisher
345			Remarks

१

प्राय॰ प्रदीप श्रीगणेशायनमः ॥ अथाग्रयणप्रायश्चित्तान्युच्यंते। तत्राग्रयणानुकल्पाः। वर्षासु श्रावणभाद्र
१ पदयोः पौर्णमास्याममावास्यायांशुक्लपक्षयुक्तदेवनक्षत्रे। शुक्लपक्षयुक्तरेवत्यांवाश्यामाकाग्रय
णंकुर्यात्। शरद्याश्वयुजिकार्तिकयोः पर्वादौयुक्तकालानामन्यतमेकालेव्रीह्याग्रयणंकुर्यात्। व
संतेचैत्रवैशाखयोः पर्वादौयुक्तकालानामन्यतमेकालेयवाग्रयणंकुर्यात्। आग्रयणानामेते
प्या॰ मुख्याःकालाः। श्यामाकाग्रयणस्यव्रीह्याग्रयणकालोगौणकालः। व्रीह्याग्रयणस्यापियवाग्र आ
यणकालोगौणकालः। यवाग्रयणकालस्यापिआश्यामाकाग्रयणकालात्गौणकालः। अना
पदिगौणकालेकुर्वन्प्रायश्चित्तपूर्वकमाग्रयणंकुर्यात्। आपत्सुगौणकालः। आपदिगौणका
लेकुर्वन्प्रायश्चित्तंनकुर्यात्। गौणकालेप्यतिक्रांतेवैश्वानरेष्टिंप्रायश्चित्तंकृत्वातिपन्नाग्रयणं
कुर्यात्। आषण्मासादाग्रयणाकरणेआग्रयणेपथिकृतेइत्यादिअग्निहोत्रादितिपादनोक्तां
रवहिर्विषामिष्टिंकृत्वातिपन्नान्याग्रयणानिक्रमेणकुर्यात्। संवत्सरांतमाग्रयणाकरणेप्या २

ति
ग्नयेपवमानायेत्यादिअग्निहोत्रापादनोक्तांसप्तहविषमिष्टिंकृत्वातिपन्नान्याग्रयणानिक्रमेण
कुर्यात्। हीताग्नेरिदंप्रायश्चित्तं। समारूढाग्नेःसक्तअग्निषुसमारूढेषुआग्रयणाकरणे। अग्नयेशु
चये। अग्नयेपवमानाय। अग्नयेतंतुमते। अग्नयेपथिकृतेइत्यग्निहोत्रा। तिपातनोक्ताश्चतस्त्रइष्टीःकृत्वा
तिपन्नान्याग्रयणानिकुर्यात्। आग्रयणंकर्तुमशक्नुवन्स्वेस्वेकालेनवैःश्यामाकव्रीहियवैःदर्शन
पौर्णमासेनवायजेत्। नवैःश्यामाकादिभिःअग्निहोत्रंवाजुहुयात्। अपिवानवानिश्यामाका
दीनिअग्निहोत्रीगामादयित्वातस्याःपयसासायंप्रातरग्निहोत्रंवाजुहुयात्। यद्वास्वेस्वेकाले
श्यामाकादिचरुःश्रारावमोदनंगार्हपत्येदर्वीहोमविधानेनश्रपयित्वावेद्यामासाद्यसमिध
माहवनीयेनिधायाज्येनाघारौहुत्वाचतुर्गृहीतहव्येनाज्यभागौहुत्वाश्यामाकचरोरवदाय
दर्वीहोमविधानेनयाज्यानुवाक्याभ्यांसोमायहुत्वास्विष्टकृतमवदायाज्यानीहुत्वास्विष्टकृत
याज्यानुवाक्याभ्यांहुत्वातत्रोक्तमंत्रेणहविःशेषंप्राश्यपरिशिष्टंसमाप्यब्राह्मणान्भोजयेत्।

एवमेव दर्वहोमविधानेन व्रीह्याग्रयणं यवाग्रयणं कुर्यात्। उक्तानां मुख्यानुकल्पानामन्यतम
प्रकारेणाग्रयणमकृत्वा नवान्नप्राशने कृते वैश्वानरीमिष्टिं प्रायश्चित्तं कुर्यात्। तथा च गोपालः
२ अनिष्ट्वाग्रयणेनाश्नन्नवं वैश्वानरीं यजेत् इति। आग्रयणानि कर्तुमशक्तोऽप्यस्याम्नायत्वेन
वैश्वानर्या यजेत्। इदमुक्तमाग्रयणविधानं। श्यामाकव्रीहियवानामेव। सस्यांतरेषु हरित
यवादिषु धान्येषु आग्रयणं कृताकृतं। नवानि फलमूलादीनि तत्तत्काले ब्राह्मणेभ्यो दत्वा
प्रयुंजीत। कालांतरेष्वुत्पन्नव्रीह्यादीनां तंडुलादिभिरग्निहोत्रादीनि कृत्वा ब्राह्मणेभ्यो दत्वा
त्वसंतेत्रोत्पन्नव्रीह्यादीनामभावेपि कीत्वाग्रयणं कुर्यात्। यथाकथंचिदाग्रयणमकृत्वा मोहाद्
तो नवान्नप्राशनं कृत्वार्तिमाप्नुयात्। तथा च कात्यायनः। आसन्नः खलु देवानामाहिताग्निर्द्विजन्म
का अस्येज्यासु हविर्देवास्तस्यंति न चान्यतः। स चेदकृत्वाग्रयणं नवमश्नाति मोहतः। देवेभ्यः क २
ल्पितं भागं भक्षयित्वार्तिमाप्नुयात्। ।इत्याग्रयणप्रायश्चित्तं। ।अथ मृगारेष्टिरुच्यते। ।

अत्र प्रायश्चित्तप्रकरणे मृगारेष्टिकथनं पापयक्ष्मादिरोगगृहीतस्याहिताग्नेः प्रायश्चित्तार्थं।
यः पापयक्ष्मादिरोगगृहीतः देवेभ्यो देवकर्मभ्यो यज्ञादिभ्यः ऋषिभ्यः अध्ययनादिभ्यः पितृभ्यः
पितृकर्मभ्यः अपत्यादिभ्यो गोभ्यो गोः सकाशादुत्पन्नक्षीरादिभ्यः ब्राह्मणेभ्यो ब्राह्मणक
मृ० तमर्यादाभ्यः परित्यक्तस्तेनाभिशस्तोभिशस्यमानो वा सरहस्योहिसंज्ञया मृगारेष्ट्याय
जेत। एतया यक्ष्यमाणो दक्षिणार्थं शतमानं हिरण्यं संपादयेत्। तस्याः काल उत्तरायणशु
क्लपक्षदेवनक्षत्राणि समुदितानि मुख्यकालः। शुद्धिकामस्य पर्वद्वयं शुक्लप्रतिपदादि
युक्तदेवनक्षत्राणि कालः। रोगयुक्तस्य त्वयमेव कालः। तस्याः प्रयोगः पूर्वेद्युर्नांदीमुखा
दि परेद्युः केशादि वापयित्वा स्नानादि पंचकं कृत्वान्वारंभणेष्ट्या यजेत। मृगारेष्ट्या यक्ष्यमा
णोन्वारंभणेष्ट्या यक्ष्ये इति संकल्पः। अन्वाधानादि तत्पर्णांतास्तंतिष्ठते। तदानीमेव यागपुर
स्तादित्यादि पापक्षयकामो मृगारेष्ट्या यक्ष्ये इति। रोगादियुक्तस्यारोग्यार्थं मृगारेष्ट्या ग

३ यस्येति। अग्नीन्विहृत्यान्वाधानादिशाखाछेदनं बर्हिराहरणमिध्मसंनहनकाले त्रयो
विंशतिधेत्यूहः। सायंदोहे मित्रावरुणाभ्यामागोमुचौरमयतां गावः। मित्रावरुणाभ्यामागोमु
ग्भ्यां हविरिंद्रियं। बकुडुग्धि मित्रावरुणाभ्यामागोमुग्भ्यां देवेभ्यो हव्यं। सोमेन त्वा तनच्मि
मित्रावरुणाभ्यामागोमुग्भ्यां दधि। एवं दोहद्वये पोष्यस्वाभूते प्रातरग्निहोत्रं वाजिनयाग।
र्थं× कृत्वा पात्रासादनकाले सूर्पद्वयं द्विपंचाशत्कपालानि भर्जनकपालमेकं तिस्रः स्थालीः
वाजिनपात्रं× कंसं चसादयति॥ बर्हिर्लोपवेशनांतं कृत्वा गार्हपत्ये आज्यं विलाप्योत्पूय स्रु
चि चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धयजमाने येन देवाः पवित्रेण० पुनंतु मा स्वा
हेति। अपरं चतुर्गृहीतं जुहोति इंद्रः सुनीति० पत्या पुनातु स्वाहेति पृथ्व्यास्तरणादि निर्वा
पकाले वपाय वामिति सूर्पद्वयमादाय धूरसीत्यादि बीजावेक्षणांतं तंत्रेण कृत्वा निरस ३
नं निर्वापादि चतुष्टयं प्रतिबीजमावर्तते। अग्नये० इंद्राय० मुचं जुष्टं निर्वपामि। इंद्राय० हो

×प्राजापत्यं०अपरं०

मुचे जुष्टं निर्वपामि। इति पिष्टं निरूप्य वायुसवितृभ्यामागोमुग्भ्यां जुष्टमिति बर्वर्थं
तंडुलान्निरूप्य। अनुमत्यै जुष्टमिति। तंडुलान्निरूप्य। अग्नये वैश्वानराय जुष्टं। द्यावापृ
भ्यां० थिवीं निरूप्य मरुद्भ्य एनोमुग्भ्यो जुष्टमिति। विश्वेभ्यो देवेभ्य एनोमुग्भ्यामिति पिष्टं
निरूप्य अनुमत्यै जुष्टमिति तंडुलान्निरूप्य अग्नये वैश्वानराय जुष्टं० द्यावापृथिवीभ्या
मंहोमुग्भ्यां जुष्टमिति पिष्टं निरूप्य प्रोक्षणादि तंडुलप्रस्कंदनांतं समानं। सायंदोह
वत्सापाकरणादि दोहः। तंडुलान्पिष्ट्वाधिश्रित्य पेषणादि कुर्यात्। कपालोपधानकाले। अग्नयेंद्रा
कपालानि इंद्रायैकादशकपालान्युपधाय। पयःस्थालीं चरुस्थालीं चाधिश्रित्य तदुत्तरतो
भर्जनकपालमधिश्रित्य मारुतार्थं सप्तकपालानि वैश्वदेवार्थं द्वादशकपालान्युपधाय
उत्तरतो नुपले चरुस्थालीमधिश्रित्य वैश्वानराय द्वादशकपालानि द्यावापृथिव्योरोभ्यां

द्वकपालेउपदध्यात्।पिष्टसंवापनादिऐंद्रपुरोडाशप्रथमांतंकृत्वा।तत्तपयसिदध्यानीयआमि
क्षांश्रपयेत्।तंडुलप्रक्षेपादिचरुंश्रपयेत्।कृष्णाजिनावधूननादियवानुलूखलेपरिक्षेपचम
४ जेनकपालमधिश्रित्ययवान्प्रक्षिप्यभर्जयेत्।मारुतवैश्वदेवपुरोडाशावधिश्रित्यअनुमत्यैतं
डुलान्प्रक्षिप्यवैश्वानरद्यावापृथिव्योप्रथयित्वाज्यनिर्वापाद्यानिनयनांतंकुर्यात्।आमिक्षांवि
भज्यवाजिनंकृत्वा।प्रतापेनिधायचरुष्टान्यवानवतार्यपात्रांतरे।तरःपवित्रंघृतमानीयय
वान्प्रक्षिप्यभस्मांगारेष्वधिश्रयेत्।वेदादानादिदविरुद्धासनांतंकुर्यात्।दर्वीष्वहूस्यां।तर्वेध्या
साद्यवाजिनमभिघार्यालंकृत्यावशयेनिधायासन्नाभिमर्शनंकुर्यात्।अग्नयेसमिध्यमा
नायानुब्रूहीत्यादिहोतासामिधेनीपुरोविकैशस्तमीमहोमपामिदंत्ययनं॰स्मत्यंशिवो
भवानमस्तेहरसेशोचिषे॰स्मत्यंशिवोभवोसमिद्धोअग्नआकुतेहत्यादिआवाहन ४
कालेअग्निंपावकवंतं॰सोमपावकवंतं॰अग्निमंहोमुचमावहेत्यादिसमानमोत्तमप्रया

अग्निर्मन्वेप्रथमस्येत्यनुवाक्या।यस्येदंप्राणंनिमिषदितियाज्या।अग्नयेरंहोमुचेहन्वाहः।इंद्रायांहोमुचेनुब्रूहिः।इं
द्रंहोमुचंयजेति।५

जात्।स्वाहाग्निंपावकवंतंस्वाहासोमंपावकवंतंस्वाहाग्निमंहोमुचंइत्यादिपावकवंतावाज्यभागौ
अग्नयेपावकवतेनुब्रूहि।अग्निंपावकवंतंयजेति।अग्नीरक्षांसिसेधतीत्यनुवाक्या।यत्तेपवित्र
मर्चिषीति।प्रथमाज्यभागस्येज्या।सोमायपावकवतेनुब्रूहिसोमंपावकवंतंयजेति।योधारयापा
वकयेत्याज्यानुवाक्या।आकलशेषुधावतीतियाज्या।अग्नयेंऽहोमुचेनुब्रूहिअग्निमंहोमुचं
यजेति।इंद्रस्यमन्येप्रथमस्येत्यनुवाक्या।यःसंग्राममितियाज्या।इंद्रस्यांहोमुचोहमिंद्रिया
वी।आमीक्षामवद्यन्नाह मित्रावरुणाभ्यामागोमुग्भ्यामनुब्रूहिमित्रावरुणावागोमुचौयजेति
।मन्वेवांमित्रावरुणेत्यनुवाक्या।योवांरुजुरथरश्मिरितियाज्या।मित्रावरुणयोरागोमुचोर
हमिंद्रियावी।अथचरोरवद्यन्नाह।वायुसवितृभ्यामागोमुग्भ्यामनुब्रूहि।वायुसवितारावागो
मुचौयजेति।वायोःसवितुर्विदथानिइत्यनुवाक्या।उपश्रेष्ठानआशिषइतियाज्या।वायुसवित्रो
रागोमुचोरहं।प्रप्रजयावेति।धानाअवद्यन्नाह।अश्विभ्यामा मनुब्रूहि।अश्विनावागो

गोमुग्भ्या

मुवोपजेति। रथीतमोरथीनामित्यनुवाक्या। त्वद्यातं वहतुमितियाज्या। अग्निर्नेता गोमुवोरहमं
द्रियावांवाद्यः। धानानामवदानेमंत्राणांवकुत्वनेनोदःकार्यः। मरुद्भ्यएनोमुम्भ्योनुब्रूहि। मरुतएनोमु
५ वोयजेति। मरुतांमन्वइत्यनुवाक्या। तिग्ममायुधमितियाज्या। मरुतामेनामुवोमुवोमहं प्राणं श्रैष्ठ्या
सं। विश्वेभ्योदेवेभ्यएनोमुम्भ्योनुब्रूहि। विश्वान्देवानेनोमुचोयजेति। देवानामन्वइत्यनुवाक्या। प
द्दिमाभिशोचतिइतियाज्या। विश्वेषांदेवानामेनामुचामहं प्राणेःसायुज्यंगमेयं। अनुमत्या अनु
ब्रूहि। अनुमतिंयजेति। अनुनोद्यानुमतिर्यज्ञमित्यनुवाक्या। अन्विदनुमतेत्वमितियाज्या। अनुम
त्या अहंप्रजनयावेति। अग्नयेवैश्वानरायानुब्रूहि। अग्निंवैश्वानरंयजेति। वैश्वानरोनऊत्या
इत्यनुवाक्या। पृष्टोदिवीतियाज्या। अग्नेर्वैश्वानरस्याहंसुरिःपूतइत्यादि। द्यावापृथिवीभ्याम
एनोमुग्भ्यामनुब्रूहि। द्यावापृथिव्यावंहोमुचौयजेति। येअप्रथेतामित्यनुवाक्या। उर्वरो ९
हसीइतियाज्या। द्यावापृथिव्योरंहोमुचोरहं उभयोर्लोकयोःसंध्यासं। स्विष्टकृतअवद्य

न्वाह। अग्नयेस्विष्टकृतेनुब्रूहि। अग्निंस्विष्टकृतंयजेति। सर्वेषामुत्तरार्धात्सकृत्सकृदवदा
यद्विरभिघारयति। पुरस्तात्स्विष्टकृतःस्रुवाहुतीरुपजुहोति। पवमानःसुवर्जनइत्यनुवाकेनप्रस्त
रंहुत्वा। यत्तेवयंपुरुषत्रेत्यनुवाक्या। अग्निंस्विष्टकृतमयाडग्निरग्नेःपावकवतःप्रियाधामा
न्ययाडिन्द्रसोमस्यपावकवतःप्रियाधामान्ययाडग्नेरंहोमुचःप्रियाधामान्ययाडिंद्रस्याग्नेरं
होमुचःप्रियाधामानीत्यादि। जातवेदाजुषतांहविर्यथादततद्भवोगौर्यैविदति। अग्नेःस्विष्ट
कृतोहमायुष्मान्। प्राशित्रपात्रादि। अन्वाहार्यमासाद्य। शतमानंहिरण्यंददातिहविःशेषानु
या द्रास्यवाजिनंचोद्रास्यवाजिनंवेद्यामासाद्ययन्मेअग्नेअस्येतियजमानो। नाभिमंत्रणेहो
ने। ब्रह्मन्प्रस्थास्यामइत्यादिहोतुःसूक्तवाके। अग्निःपावकवानिदं। सोमःपावकवानिदं। अ
ग्निरंहोमुचमिदं। इन्द्राग्नीअंहोमुगिदं। हविरित्यादि। अजुषत। अजुषेतां। अजुषंतेत्यादि।
स्रुग्विमोकांतंसमानं। वाजिनयागार्थंकंसमादायजुहूवर, तामन्यवेद्यामासाद्यवाजि

नमानयन्नाह। वाजिभ्योनुब्रूहि। वाजिनोयजेति। वां नोअर्वंतुवाजिन इत्यनुवाक्या। वाजेवाज इ
६ तियाज्या। होमकाले। वाजिभ्यःस्वाहेतिहुत्वा। अनुवषट्कृतेवहुत्वा इडांप्रदायोपहवमिष्ट्वाय
जमानःप्रत्यक्षंभक्षयति। यन्मेरेतःप्रसिच्यतइतिसौमगृहपतियागात्। पुरस्ताद्गृहपतेःस्कंवा नमा
हुतीरुपजुहोति। यद्देवादेवहेडनमित्या अछिद्रकानुवाकेनप्रत्यृचंहुत्वापुनरालंभकर्णंत
र्पणांतासंतिष्ठते। ।एतयैवयजेतर्तुव्यतिक्रमेदारव्यतिक्रमेअयोनौवारेतःसिक्त्वा एतयै
वयजेतपातकोपपातकसंयुक्तोद्वादशाहंमहापातकसंयुक्तोमासमेकंपुनःपुनमिष्ट्वासंवत्स
रमृतुंवायजेतेति। ।इतिमृगारेष्टिः। ।अथपवित्रेष्टिः। ।इहप्रायश्चित्तप्रकरणेपवित्रेष्टि
कथनंयजमानपत्न्योःसंवत्सरातिप्रवासेप्रायश्चित्तार्थं। यथाहगोपालः। वत्सरातिप्रवासे
त तुपवित्रेष्टिःस्त्रियोरपिवेदिति। अभिशस्तः अभिशस्यमानोवापापक्षयकामोवापवित्र्ये ६
ष्ट्यायजेत। एतयेष्ट्यायक्ष्यमाणोदक्षिणार्थंशतमानंहिरण्यंसंपादयेत्। मृगारेष्टामुक्तः

काल एवास्यापिकालः प्रवसतोःपत्नीयजमानयोःप्रवासानंतरंकर्तव्या। तस्याःप्रयोगःपूर्वे
द्युर्नांदीमुखादिपरेद्युःकेशादिवापयित्वास्नात्वाहिपंचकंकृत्वान्वारंभणीयांकृत्वातदानीं
मेवयाःपुरस्तादित्यादिसंवत्सरातिप्रवासप्रायश्चित्तार्थंपवित्रेष्ट्यायक्ष्ये। पापक्षयकामस्य
पापक्षयार्थंपवित्रेष्ट्यायक्ष्य इतिसंकल्प्य। अग्नीन्विहृत्यअन्वाधानादिइध्मसंनहनेत्रयो
विंशतिध्मव्यूहः। सोपवसथःसद्यस्कालोवापाणिसंमर्शनादिपात्रासादनकालेचतुस्त्रि
ंशत्कपालानिवेदस्योपवेशानांतेगार्हपत्येआज्यंविलाप्योत्पूयस्रुवचतुर्गृहीतंगृहीत्वाह
वनीयेजुहोति। अन्वारब्धेयजमाने। येनदेवाःपवित्रेण० प्राजापत्यंपवित्रं० इंद्रःसुनीतीसह
मापुनात्वितित्रिभिःप्रत्यृचमादिनिर्वापकालेअग्नयेपवमानायाग्नयेपावकायाग्नयेशुचये
ग्नयेव्रतपतयेग्नयेवैश्वानरायइतिपंचपुरोडाशान्निरूप्यप्रोक्षणादिकपालोपधान
कालेचतुर्णामष्टाकपालानिवैश्वानरायद्वादशकपालान्युपदध्यात्। संपापादिमंत्रस्या

पवमानपुरोडाशप्रथनानंतरं आज्यं निरूप्य पावकादीन् प्रथयेत्। त्वंयाह्वादिवेद्यामासन्नाभिम
र्शनांतं कुर्यात्। अग्नये समिध्यमानायानुब्रूहि इत्यादिहोता सामिधेनीषु शोचिष्केशस्तमीमहे
मपामिदं न्ययनं॰ शिवो भव नो मस्ते हरसे शोचिषे॰ शिवो भवो समिद्धो अग्न इत्यादि आवाहनकाले
अग्निं पावकवंतमावह। अग्निं पवमानमावह। आज्यहविषां पंचदेवतानां आवाहनादिषु उपांशु
त्वं सरस्वती प्रियामित्युपांशु। आवह देवान् यजमानाय अग्निं इत्यादि। देवा आज्यपा इत्यादि समानमो तम प्रयाजात्। उ
त्तमप्रयाजे स्वाहाग्निं पावकवंतं स्वाहा सोमं पावकवंतं स्वाहाग्निं पवमानं स्वाहा सरस्वतीं प्रिया
मित्यादि प्रयाजशेषेणाभिघारणे पुरोडाशमभिघार्य पुनर्ध्रुवामभिघारयेत्। एवमेव प्रतिपुरोडा
शाभिघारणानंतरं ध्रुवामभिघारयेत्। अग्नये पावकवतेनुब्रूहि। अग्निं पावकवंतं यजेति।
अग्नी रक्षांसि सेधतीत्यनुवाक्या। यत्ते पवित्रमर्चिषीति याज्या। प्रथमास्यैभागस्य। सोमा
य पावकवतेनुब्रूहि। सोमं पावकवंतं यजेति। यो धारया पावकयेत्यनुवाक्या। आकलशेषु

धावति पवित्र इति याज्या। द्वितीयस्याप्रथमपुरोडाशाद्यवद्यन्नाह। अग्नये पवमानायानुब्रूहि।
अग्निं पवमानं यजेति। अग्न आयूंषि पवस इत्यनुवाक्या। अग्ने पवस्व स्वपा इति याज्या। अग्नेः
पवमानस्याहं शुचिः पूतो मेध्यो विपाप्मा व्रतं वसूयं स्यं नाहो भूयासं। चतुरात्ययस्यगत्तानआह।
सरस्वत्यै प्रिया इत्युपांशु अनुब्रूहि इत्युक्ते सरस्वतीं प्रियामित्युपांशु यजेत्युक्ते। उत नः प्रिया प्रियास्वि
ति अनुवाक्या। इमा जुह्वाना युष्मदा नमोभिरिति याज्या। उपांशु याज्यपंचकस्य। हविरसीत्यनु
मंत्रणं। द्वितीयपुरोडाशादवद्यन्नाह। अग्नये पावकवतेनुब्रूहि। अग्निं पावकवंतं यजेति। अग्ने
पावक स नः पावकेति याज्यानुवाक्ये। अग्नेः पावकस्याहं शुचिः पूत इत्यादि। चतुरात्ययस्यगत्ता
नआह। सवित्रे सत्यप्रसवायेत्युपांशु अनुब्रूहीत्युक्ते। सवितारं सत्यप्रसवमित्युपांशु यजेत्युक्ते
आविश्वदेवमित्यनुवाक्या। आ सत्येनेति याज्या। हविरसीति। तृतीयपुरोडाशादवद्यन्ना
ह। अग्नये शुचयेनुब्रूहि। अग्निं शुचिं यजेति। अग्निः शुचिव्रततमः। उदग्ने शुचयस्तवेति याज्या

ज्यानुवाक्ये।अग्निश्शुचेरहंशुचिःपूतरित्यादि।चतुरआज्यस्यगृह्णानआह।वायवेनियुत्वतेउपांशुअनु
ब्रूहीत्युच्चैः।वायुंनियुत्वंतमित्युपांशुयजेत्युच्चैः।वायुरग्रेगाइत्यनुवाक्या।वायोशुक्रोअयामितेरतिया
ज्या।दब्धिरसीत्यादि।चतुर्थपुरोडाशादवद्यन्नाह।अग्नयेव्रतपतयेनुब्रूहि।अग्निंव्रतपतिंयजेति।
त्वमग्नेव्रतपाअसि।यद्वोवयंप्रमिनामेतियाज्यानुवाक्ये।अग्नेर्व्रतपतेरहंशुचिःपूतरित्यादि।चतुरा
ज्यस्यगृह्णानआह।विष्णवेशिपिविष्टायेत्युपांशुअनुब्रूहीत्युच्चैः।विष्णुंशिपिविष्टमित्युपांशुयजे
त्युच्चैः।प्रतत्तेअद्येत्यनुवाक्या।किमित्तेविष्णोइतियाज्या।दब्धिरसीत्यादि।पंचपुरोडाशादवद्यन्ना
ह।अग्नयेवैश्वानरायानुब्रूहि।अग्निंवैश्वानरंयजेति।वैश्वानरोनऊत्याप्रष्टोदिवीतियाज्यानुवा
क्ये।अग्नेर्वैश्वानरस्याहंशुचिःपूतइत्यादि।चतुराज्यस्यगृह्णानआह।दधिक्राव्णेइत्युपांशुअ
नुब्रूहीत्युच्चैः।दधिक्रावाणमित्युपांशुयजेत्युच्चैः।दधिक्राव्णोअकारिषमितिपुरोनुवाक्या।आद
धिक्राइतियाज्या।दब्धिरसीत्यादि।सौविष्टकृतमवद्यन्नाह।अग्नयेस्विष्टकृतेनुब्रूहि।अग्निंस्वि
ष्टकृतंयजेति।स्विष्टकृदर्थंप्रतिपुरोडाशावदानानंतरंसकृत्सकृदाज्यात्स्विष्टकृत्वोवद्यद्विरभिघार्य

ति।स्विष्टकृतःपुरस्तान्स्रुवाहुतीर्जुहोति।पवमानःसुवर्जनइत्येतानानुवाकेनप्रत्यृचं।होताजुषो
दम्नाअतिथिरितिअनुवाक्या।येयजामहेग्निंस्विष्टकृतमयाळग्निरग्नेःपावकस्यप्रियाधामान्यया
ट्सोमस्यपावकवतःप्रियाधामान्ययाडग्नेःपवमानस्यप्रियाधामानिइत्यादि।जुषतांहविर्मर्जा
त्योम्नज्यतेस्वेहमनाकविप्रशास्तो।ओंस्यन्याचोपाक्षिति।अग्नेःस्विष्टकृतोहमायुष्मान्।आशि
त्रावदानंइडावदानेपिप्रतिपुरोडाशावदानानंतरंद्विर्द्विराज्यावदानंप्रसिद्धेडान्वाहार्यमासाद्यशंतमा
नंहिरण्यंददाति।समानंकर्मासूक्तवाकात्।सूक्तवाकेनिगदे।अग्निःपावकवानिदंहविः।सोमः
पावकवानिदं।अग्निःपावकवानिदंहविरजुषतइत्यादि।समानंकर्मापत्नीसंयाजेभ्यःपुरस्ताद्भुक्ष
तःस्रुवाहुतीरुपजुहोति।यद्देवादेवहेडनमितिआद्यैःअष्टकेनानुवाकेनप्रत्यृचं।दपानियागादि
ब्राह्मणतर्पणांतासंतिष्ठते।अभिशस्तोभिशस्यमानोवैतयेष्टयायजेत।एतयेष्ट्वाद्दशपूर्वान्दशा
परान्आत्मानंचैकविंशंपंक्तिंपुनाति।अथाप्युदाहरंति।वैश्वानरींव्रातपतिंपवित्रेष्टिंतथैवच।ताहतो।
मृगारेष्टिंचकुर्वाणःपुनात्याविंशतिंकुलं।वैश्वानरींव्रतपतिंपवित्रेष्टिंतथैवच।सताहतोमयुंजा

नःपुनातिदशपौरुषमिति। ।इतिपवित्रेष्टिप्रयोगः। ।अथनक्षत्रेष्ट्योवक्ष्यंते। ।इत्थमायश्चि
त्तप्रकरणेनक्षत्रेष्टीनामुपदेशःपुरोडाशभेदेनादोषायश्चित्तार्थआयुष्मत्यस्तकेनेष्ट्याइत्यावाथेयो
क्तत्वान्नक्षत्रेष्ट्योप्यायुष्मत्यःप्रयोगोवक्ष्यते।नक्षत्रेष्ट्यनुष्ठानेनपापक्षयोभवति।नक्षत्रेष्ट्यनुष्ठाना
ज्ज्योतिस्त्वंप्राप्नोतिमृत्युमपजयतिअन्नाद्यकामोपिनक्षत्रेष्टिभिर्यजेत।आयुष्कामस्तुनक्षत्रेष्टि
भिर्यजेत्अथवास्वजन्मनक्षत्रेष्ट्यायावज्जीवंयजेतत्रिःकृत्वोवानक्षत्रेष्ट्यारंभकालः।चैत्रमासा
मावास्यायांअपभरणीयोगेसतितस्यामुपक्रमः। अथवावैशाखपौर्णमास्याममावास्यायामा
रंभः।अथवाफाल्गुनादिमासत्रयेयस्यांतिथावपभरणीयोगस्तस्यामारंभःकर्त्तव्यः।यस्यांत
दुक्तमसंपद्यतेतत्कृत्केत्वात्उपक्रमाद्दिवसात्पूर्वेद्युर्नांदीमुखादिःश्वोभूतेप्रातरग्निहोत्रंकृत्वा
केशादिवापयित्वास्नानादिपंचकंकृत्वाअजस्रैःसमारोप्यवाद्वसायमथित्वाग्नीविहृत्यमन
स्वनींकृत्वायाःपुरस्तादित्यादिआयुष्कामोवान्नाद्यकामोवास्वर्गकामोवानक्षत्रेष्टिभिर्यक्ष्ये
नक्षत्रसत्रेणवायक्ष्येइतिसंकल्पः।सविष्वरणादिनक्षत्रसत्रेणयक्ष्यमाणोन्वारंभेष्ट्याय

क्ष्यइतिसंकल्पः। अथवानक्षत्रेष्टिभिर्यक्ष्यमाणोन्वारंभेष्ट्यायक्ष्याइतिसंकल्प्यान्वा
रंभणीष्टिंकुर्यात्। अथश्वोभूतेकृत्तिकानक्षत्रेप्रातरग्निहोत्रंकृत्वा। याःपुरस्तादित्या
दिआन्नाद्यकामः कृत्तिकानक्षत्रेष्ट्यायक्ष्येसंकल्प्याग्नीन्विहृत्यान्वाधानादिकुर्या
त्। प्रथमेष्टिदिवसेविहृतेष्वेवाग्निषु सर्वेषांनक्षत्रेष्टीनांयागः। प्रतीक्ष्याग्निविहरणं
वानक्षत्रेष्टीनांसोपवसथत्वंसद्यस्कालत्वंवासोपवसथत्वंपक्षे। अन्वारंभेष्ट्यनंतर
मेवप्रथमेष्ट्यन्वाधानादिकृत्वोपोष्यश्वोभूतेयजेत्। इध्मसंनहनकालेसर्वासांनक्ष
त्रेष्टीनांत्रयोविंशतिरिध्मान्संनह्य। निर्वापकालेअग्नयेअष्टाकपालंपुरोडाशानिरूप्यअग्न
येकृत्तिकाभ्योजुष्टंनिर्वपामिइतिअष्टाकपालंपुरोडाशानिरूप्यानुमंत्रेजुष्टमितिवर्
निर्वपेत्। सर्वासांनक्षत्रेष्टिषुनक्षत्रदेवताहविर्भेदेयद्रव्यंतदेवाम्यनुमंत्र्योः अन्यत्रवाय
व्यपयसि आज्यहविषोश्चप्रोक्षणादिसमानंआहविरासादनात्। होतुःसामिधेनीषु
समिध्यमानांचसमिधानांतरेपास्वारुह्ययस्याश्रियोदृशो अदाभ्यःपुरएतेतिश्रीमंत्योधा
य्यसर्वासांनक्षत्रेष्टीनांआज्यभागयोः। आग्निर्नारियमिमं नवंयस्यानइत्याज्य

भागयोनुवाक्ये जुषाणो अग्निः जुषाणः सोमइत्याज्यभागयोर्याज्ये· सर्वत्रायुष्मा
मस्यतु आनो अग्ने सुकेतुना त्वं सोममहे भगमित्याज्यभागयोनुवाक्ये· अथहवि
र्भिर्यजति· अग्नेनुब्रूहि अग्निंयजेति अग्निर्मूर्धेत्यनुवाक्या भुवोयज्ञस्येति याज्या
१० अग्निरहमन्नादः अग्नये कृत्तिकाभ्योनुब्रूहि अग्निं कृत्तिकायजेति । अग्निर्नःपा
तु कृत्तिका इत्यनुवाक्या यस्य भान्ति रश्मयो यस्य केतव इति याज्या अग्नेः कृत्ति
अनुमत्या कानामहमन्नादः· अनुब्रूहि अनुमतिं यजेति अनुनोद्यानुमतिर्यज्ञमित्यनुवाक्या
अन्विदनुमते त्वमिति याज्या अनुमत्या अहं प्रजया च पशुभिश्च जनिषीयेति·
सर्वासु नक्षत्रेष्टिषु संचारदेवतयोः अग्न्यनुमत्योः एता एव याज्या अनुवाक्याः· सर्वेषां
हविषामुत्तरार्धात्स्विष्टकृतमवदाय द्विरभिघार्य स्विष्टकृतः पूर्वं स्रुवेणापहोमान्
जुहोति· अग्नये स्वाहा· कृत्तिकाभ्यः स्वाहा· अंबायै स्वाहेति नव स्रुवाहुतीः
यथालिंगमुद्देशः सर्वासां नक्षत्रेष्टीनां पुरस्तात् स्विष्टकृतः स्रुवेणापहोमाञ्जुहु
यात्· अग्नये स्विष्टकृतेनुब्रूहि अग्निं स्विष्टकृतं यजेति हव्यवाहमभिमातिषाहमि १०

त्यनुवाक्या । स्विष्टमग्ने अभितत्पृणाहीति याज्या । सर्वासां नक्षत्रेष्टीनां एत एव स्विष्ट
कृतः संयाज्ये । अग्नेः स्विष्टकृतोहमायुष्मान् इत्यादि । प्राशित्रपात्रावदानाद्यन्वाहार्यासादनां
तं समानं । अन्वाहार्यमासाद्य गां ददाति कृत्तिकाय गामिति प्रतियज्ञः सर्वासां नक्षत्रेष्टीनाम
न्वाहार्येण सह गां दक्षिणा च समानमनुयाजादि ब्राह्मणतर्पणान्तां संतिष्ठते नक्षत्रेष्टुपक्र
मदिवसप्रभृति समाप्तिपर्यंत पत्नीयजमानौ व्रतचारिणौ भवतः अधःशायिनौ ब्रह्मचा
रिणौ स्यातां यजमानो हविरुच्छिष्टं भुंजीत हविष्यं पत्नी । यद्वा उभावपि हविष्यमेवाश्नीयातां ।
अथ श्वोभूते प्रातरग्निहोत्रं कृत्वा याः पुरस्तादित्यादि इष्टिप्राप्तिकामो रोहिणी नक्षत्रेष्ट्या
यक्ष्य इति संकल्पः । अग्न्यन्वाधानादि निर्वापकाले आग्नेयं निरुप्य प्रजापतये रोहिण्यै
जुष्टं निर्वपामीति चरुं निरुप्यानुमत्यै निरुप्य प्रोक्षणादि समानमाहविरासादनात् ॥

आग्नेयेनप्रचर्यप्रजापतयइत्युपांशुरोहिण्याअनुब्रूहीत्युक्त्वैःप्रजापतिमित्युपांशुरोहि
११ णीयजेत्युक्त्वैः।प्रजापतेरोहिणीवेतुपत्नीत्यनुवाक्यारोहिणीदेव्युदगादितियाज्याप्रजापते
रोहिण्याअहंप्रप्रजयावेति।स्विष्टकृतमवदायोपहोमानुजुहोति।प्रजापतयेस्वाहा।रोहि
ण्यैस्वाहेतिचतुर्थस्विष्टकृदादिसमानं।अनुयाजप्रभृतितर्पणांतासंतिष्ठते। ।श्वोभूतेप्रा
तरग्निहोत्रंहुत्वायाःपुरस्तादित्यादिसमानानामाधिपत्यकामोमृगशीर्षेनक्षत्रेष्ट्यायक्ष्य
इतिसंकल्प्यः।निर्वापकालेआग्नेयंनिरूप्यसोमायमृगशीर्षायजुष्टंनिर्वपामीतिश्यामाका
न्निरूप्यपयसिश्रपयेत्।अनुमत्यैजुष्टमित्यादिसमानमाहविःप्रचारात्।आग्नेयेनप्रचर्य
सोमायमृगशीर्षायानुब्रूहि।सोमंमृगशीर्षंयजेतिसोमोराजामृगशीर्षेणआगन्नित्य
नुवाक्या।यत्तेनक्षत्रंमृगशीर्षमस्तीतियाज्या।सोमस्यमृगशीर्षस्याहंप्रप्रजयावेतिसो
मायस्वाहामृगशीर्षायस्वाहेति।षडुपहोमान्जुहोतिस्विष्टकृदादिसमानं।अनुयाजा ११

दितर्पणांतासंतिष्ठते। ।श्वोभूतेप्रातरग्निहोत्रंहुत्वायाःपुरस्तादित्यादिपशुकामआर्द्रानक्ष
त्रेष्ट्यायक्ष्यइतिसंकल्प्य।।निर्वापकालेआग्नेयंनिरूप्यरुद्रायार्द्रायैजुष्टंनिर्वपामीतिप्रियंगुन्नि
रूप्यचरुंपयसिश्रपयेत्समानमाहविःप्रचारात्।आग्नेयेनप्रचर्यरुद्रायार्द्रायाअनुब्रूहि।रुद्रमार्द्रा
यजेति।आर्द्रयारुद्रःअनुवाक्याहेतिःरुद्रस्येतियाज्या।रुद्रस्यार्द्र[illegible]याअहंप्रप्रजयावेति।अनुम
तियागादिरुद्रायस्वाहेत्यादिचत्वारउपहोमाः।स्विष्टकृदादिसमानं।अनुयाजादितर्पणांता।संतिष्ठ
ते। ।श्वोभूतेप्रातरग्निहोत्रंहुत्वायाःपुरस्तादित्यादिप्रजापशुकामःपुनर्वसुनक्षत्रेष्ट्यायक्ष्यइ
तिसंकल्प्यः।निर्वापकालेआग्नेयंनिरूप्यअदित्यैपुनर्वसुभ्यांजुष्टंनिर्वपामीतिचरुंनिरूप्यश्रप
येत्।समानमाग्नेयप्रचरात्।अदित्यैपुनर्वसुभ्यामनुब्रूहि।अदितिंपुनर्वसूयजेतिपुनर्नोदेव्य
दितिरित्यनुवाक्या।एवानदेव्यदितिरितियाज्या।आदित्याःपुनर्वस्वोरहंप्रप्रजयावेति।अदित्यै
स्वाहापुनर्वसुभ्यां।मित्यादिचत्वारउपहोमाः।स्विष्टकृदादिसमानं।अनुयाजादितर्पणांतासं

इतियाज्या। बृहस्पतेस्तिष्यस्याहं प्रजनयावे॰ बृहस्पतये स्वाहा तिष्याय स्वाहा इत्यादि

तिष्ठते। ।श्वोभूते प्रातरग्निहोत्रं हुत्वा पुरस्तादित्यादि ब्रह्मवर्चसकामस्तिष्यनक्षत्रेष्ट्यायक्ष्य इति संकल्प्य। निर्वापकाले आग्नेयं निरूप्य। बृहस्पतये तिष्याय जुष्टं निर्वपामीति नीवारान्निरूप्य पयसि श्र
१२ पयेत्। समानमाग्नेयप्रचारात्। बृहस्पतये तिष्यायानुब्रूहि। बृहस्पतिं तिष्यं यजेति। बृहस्पतिः प्रथमं जाय
मान इत्यनुवाक्या तिष्यः पुरस्तादित्यादि समानं। अनुयाजादि तर्पणान्तां संतिष्ठते। ।श्वोभूते प्रातरग्नि
होत्रं हुत्वा पुरस्तादित्यादि स्नानात्व्योपसनान्तिकामः आश्लेषानक्षत्रेष्ट्यायक्ष्य इति संकल्प्य। निर्वाप
काले आग्नेयं निरूप्य सर्पेभ्य आश्लेषाभ्यो जुष्टं निर्वपामीति यवान्निरूप्य प्रोक्षणादि हुत्वाय वानुल्
खले परिस्कंध गार्हपत्ये भर्जन कपालमधिश्रित्य तत्र यवान्नवताप्येम्यो वधूननादि पिष्ट्वा भस्म
मिश्रं पंगारेषु पात्रमधिश्रित्य तिरःपवित्रमाज्यमानीय तिरःपवित्रं करंस्तानोवपति समाहितः नमा३
प्रचारात्। सर्पेभ्य आश्लेषाभ्योनुब्रूहि। सर्पानाश्लेषाय जेति। इदं सर्पेभ्य इत्यनुवाक्या। येरोचने
सूर्यस्यापि सर्पा इति याज्या। सर्पाणामाश्लेषाणामहं॰ इन्नहाभूयासं। सर्पेभ्यः स्वाहेत्यादित्रय १२

उपहोमाः स्विष्टकृदादि समानं अनुयाजादि तर्पणान्तां संतिष्ठते। ।श्वोभूते प्रातरग्निहोत्रं हुत्वा पुरस्ता
दित्यादि सद्धिकामो मघानक्षत्रेष्ट्यायक्ष्य इति संकल्प्य। निर्वापकाले आग्नेयं निरूप्य पितृभ्यो मघाभ्यो
जुष्टं निर्वपामीति निरूप्य निर्वापादि प्राचीनावीति र्त्वं पित्र्यर्थेषु अग्न्यनुमन्त्रोपर्यज्ञोपवीती त्विं कपालोप
धानकाले षट्कपालोपाधानादि समानमाग्नेयप्रचारात्। पितृभ्यो मघाभ्यो नुब्रूहि। अनत्सा कव्यैश्र्वा वा
व्याट् पितृन्मघाय जेति वषट्कृते दक्षिणार्धे पुर्वार्धे प्राचीनावीती जुहोति। उपहूताः पितर इत्यनुवा
क्या ये अग्निदग्धा ये इति याज्या पितॄणां मघानामहं देवयज्यया इन्नहाभूयासं॰ पितृभ्यः स्वाहा मघा
भ्यः स्वाहेत्यादि। पंचोपहोमाः स्विष्टकृदादि समानं अनुयाजादि तर्पणान्तां संतिष्ठते। ।श्वोभूते प्रा
तरग्निहोत्रं हुत्वा पुरस्तादित्यादि पशुकामः पूर्वाफल्गुनीनक्षत्रेष्ट्यायक्ष्य इति संकल्प्य। निर्वा
पकाले आग्नेयं निरूप्य अर्यम्णे फल्गुनीभ्यां जुष्टं निर्वपामीति चरुं निरूप्य श्रपयेत्। समानमाग्ने
यप्रचारात्। अर्यम्णे फल्गुनीभ्यामनुब्रूहि। अर्यमाणं फल्गुनी यजेति। गवां पतिरित्यनुवाक्या। ये

नेमा विश्वेति याज्या। अर्यम्णः फल्गुन्योरहं प्रप्रजयानेति। अर्यम्णे स्वाहेति त्रय उपहोमाः। स्वि
२३ ष्टकृदादि समानं अनुयाज्यादि तर्पणांतां संतिष्ठते। ।श्वोभूते प्रातरग्निहोत्रं कृत्वा याः पुरस्तादित्या
दि भाग्यश्रैष्ठ्यकामः उत्तराफल्गुनीनक्षत्रेष्ट्या यक्ष्य इति संकल्प्य। निर्वापकाले आग्नेयं निरुप्य भ
गाय फल्गुनीभ्यां जुष्टं निर्वपामि इति चरुं निरूप्य श्रपयेत् समानमा हविः प्रचारात्। भगाय फल्गु
नीभ्यामनुब्रूहि। भगं फल्गुनी यजेति। श्रेष्ठो देवानामित्यनुवाक्या। भगो ह दाता भग इति याज्या। भ
गस्य फल्गुन्योरहं प्रप्रजयानेति। भगाय स्वाहेति त्रय उपहोमाः। स्विष्टकृदादि समानं अनुयाज्या
दि तर्पणांतां संतिष्ठते। ।श्वोभूते प्रातरग्निहोत्रं कृत्वा याः पुरस्तादित्यादि हस्तनक्षत्रेष्ट्या यक्ष्ये
ता मनुष्याः श्रद्दधीरन् सवितृसमानानां स्यामिति संकल्प्य। निर्वापकाले सवित्रे हस्ताय जुष्टं निर्व
पामीति। आव्रीहीणां निर्वापः कपालोपधाने द्वादशकपालान्युपदधाति समानमाग्नेय प्रचारा
त्। सवित्रे हस्तायोपांशु हस्तायानुब्रूहि। स्वावैः सवितारमित्युपांशु हस्तं यजेत्स्वावैः। आयातु देवः सवि २३

तेत्यादि अनुवाक्या। हस्तः प्रयच्छत्वमृतं वसीय इति याज्या। सवितुर्हस्तस्याहं स्वस्तिमान्भूयासं॥
सवित्रे स्वाहा हस्ताय स्वाहेति षडुपहोमाः। स्विष्टकृदादि तर्पणांतां संतिष्ठते। ।श्वोभूते प्रातरग्निहोत्रं कृ
त्वा याः पुरस्तादित्यादि चित्रानक्षत्रेष्ट्या यक्ष्ये चित्रं प्रजां विंदेयेति संकल्प्य। निर्वापकाले त्वष्ट्रे चित्रायै जु
ष्टं निर्वपामीति निर्वापः। कपालोपधानकाले अष्टौ कपालान्युपदधाति समानमाग्नेय प्रचारात्। त्वष्ट्रे चि
त्रायै अनुब्रूहि। त्वष्टारं चित्रां यजेति। त्वष्टा नक्षत्रमभ्येतीत्यनुवाक्या। तन्नस्त्वष्टेति याज्या। त्वष्ट्रे चित्रायै अ
हं अन्नादः त्वष्ट्रे स्वाहेति चत्वारः उपहोमाः। स्विष्टकृदादि तर्पणांतां संतिष्ठते। ।श्वोभूते प्रातरग्निहोत्रं कृ
त्वा याः पुरस्तादित्यादि स्वाती नक्षत्रेष्ट्या यक्ष्ये कामचारमेषु लोकेष्वभिजयेयामिति संकल्प्य। अन्वाधा
नादि शाखोच्छेदनं शाखापवित्रकरणं निर्वापकाले आग्नेयं निरुप्य अनुमत्यै चरुं निर्वपादि प्रातर्दोह
काले वायवे निष्ट्यायै सकृत्प्रसूताया गोः पयो दोहयति। एता आचरंतीत्यादि इह वो वायुनिष्ट्यायै देवे
भ्यो हव्यमाप्यायतां पुनरित्यादि समानमाग्नेयप्रचारात्। आग्नेयेन प्रचर्य वायवे निष्ट्याया अनुब्रू

९४

वायुंनिर्वाप्यजेति।अवदानकालेपयसःस्रुवेणद्विरवदाययजेत्।वायुर्नक्षत्रमभ्येतीत्यनुवाक्या।तन्नो
वायुरितियाज्या।वायोर्निष्ट्यायअहं॰इंद्रियावीजेमानमितिवा।वायवेस्वाहेत्यादयःचत्वारउपहोमाः।स्विष्ट
कृदादितर्पणांतासंतिष्ठते। ।श्वोभूतेयाःपुरस्तादित्यादिसमानानांश्रैष्ठ्यकामोविशाखानक्षत्रेष्ट्या
यक्ष्येइतिसंकल्पः।निर्वापकालेइंद्राग्निभ्यांविशाखाभ्यांजुष्टंनिर्वपामीतिनिर्वापः।कपालोपधानका
लेएकादशकपालान्युपदधातिसमानमाग्नेयप्रचारात्।इंद्राग्निभ्यांविशाखाभ्यामनुब्रूहि।इंद्राग्नि
विशाखेयजेति।इंद्रमस्मद्रक्षत्यनुवाक्या।नक्षत्राणामधिपत्नीइतियाज्या।इंद्राग्न्योर्विशाखयो
रहं॰इंद्रियावीअन्नादः।इंद्राग्निभ्यांस्वाहेतिचत्वारउपहोमाः।स्विष्टकृदादितर्पणांतासंतिष्ठते। ।अ
थतदानीमेवपौर्णमासीमाज्येनहविषायजेत।याःपुरस्तादित्यादिकामावाप्तिकामःपौर्णमासीदेवता
माज्यहविषायक्ष्येइतिसंकल्पः।आग्नेयनिर्वापादिआग्नेयपुरोडाशमधिश्रित्यआज्यंनिरूप्यच
र्वधिश्रयणादिसमानमाहविःप्रचारात्।आग्नेयेनप्रचर्यपौर्णमास्याअनुब्रूहिपौर्णमासींयजेति ९४

ध्रुवायाज्यांचतुर्गृहीत्वायजति।पूर्णापश्चादित्यनुवाक्या।पृथिवीसुवर्चाइतियाज्या।पौर्णमास्याप्र
चारकालेउपांशुयजेत्दब्धिरसीत्यनुमंत्रणं।पौर्णमास्यैस्वाहेत्यादित्रयउपहोमाः।स्विष्टकृदादितर्प
णांतासंतिष्ठते। ।श्वोभूतेप्रातरग्निहोत्रंहुत्वायाःपुरस्तादित्यादिमित्रधेयामित्रजयकामःअनू
राधानक्षत्रेष्ट्यायक्ष्येइतिसंकल्पः।आग्नेयंनिरूप्यमित्रायानुराधेभ्योजुष्टमितिचरुंनिरूप्यश्रप
येत्।अनुमत्यैचरुनिर्वापादिसमानमाहविःप्रचारात्।मित्रायानुराधेभ्योनुब्रूहि।मित्रमनूराधा
न्यजेति।हव्यास्मद्व्येनमसइतिअनुवाक्या।चित्रानक्षत्रमितियाज्या।मित्रस्यानूराधाना
महं॰प्रमजयाचेति॰मित्रायस्वाहेत्यादिचत्वारउपहोमाः।स्विष्टकृदादितर्पणांतासंतिष्ठते।
अथश्वोभूतेप्रातरग्निहोत्रंहुत्वायाःपुरस्तादित्यादिज्यैष्ठ्यकामोज्येष्ठानक्षत्रेष्ट्यायक्ष्यइति
संकल्पः।आग्नेयंचरुंनिरूप्यइंद्रायज्येष्ठायेजुष्टमितिमहाव्रीहीणांनिर्वपेत्।अनुमत्यैच
रुं।कपालोपधानकालेएकादशकपालान्युपदधाति।समानमाग्नेयप्रचारात्।इंद्रायज्येष्ठा

८

९५ यानुब्रूहि। इंद्रंज्येष्ठायजेति। इंद्रोज्येष्ठामनुनक्षत्रमेतीत्यनुवाक्या। पुरंदरायेतियाज्या। इंद्रस्य
ज्येष्ठायोअहमिंद्रियावीभूयासं। इंद्रायस्वाहेत्यादिचत्वारउपहोमाः। स्विष्टकृदादितर्पणांतासं
तिष्ठते। ।श्वोभूतेप्रातरग्निहोत्रंकृत्वा यः पुरस्तादित्यादिमूलनक्षत्रेष्ट्यायक्ष्ये मूलंप्रजांविंदे
येतिसंकल्प्य। आग्नेयंनिरूप्यप्रजापतयेमूलायजुष्टंनिर्वपामि। इतिचरुंनिरूप्यश्रपयेत्। आग्नेये
नप्रचर्य प्रजापतयेमूलायानुब्रूहि। प्रजापतिंमूलंयजेति। मूलंप्रजांवीरवतींइत्यनुवाक्या। अहंनो
अद्येतियाज्या। प्रजापतेर्मूलस्याहंप्रप्रजयावेति। प्रजापतयेस्वाहेत्यादित्रयउपहोमाः। स्विष्टकृदादि
तर्पणांतासंतिष्ठते। ।श्वोभूतेप्रातरग्निहोत्रंकृत्वा यः पुरस्तादित्यादिकामानांजयकामः पूर्वाषाढान
श्रा ३ क्षत्रेणयक्ष्ये इतिसंकल्प्यः। आग्नेयंनिरूप्य अद्भ्य आषाढाभ्योजुष्टंनिर्वपामीति। चरुंनिरूप्यअ
नुमत्यैजुष्टमितिश्रपणादिसमानमाग्नेयप्रचारात्। प्रचारकालेअद्भ्यआषाढाभ्योनुब्रूहि। अपोआ
षाढायजेति। यादिव्याआपइत्यनुवाक्या। याश्चकूप्याइतियाज्या। अपामाषाढानामहंप्रप्रजया ९५

वेति अद्भ्यः स्वाहेतिपंचोपहोमाः। स्विष्टकृदादितर्पणांतासंतिष्ठते। ।श्वोभूतेप्रातरग्निहो
त्रंकृत्वा यः पुरस्तादित्यादिअनपजय्यंजय्यकाम उत्तराषाढानक्षत्रेष्ट्यायक्ष्य इतिसंकल्प्य। आ
ग्नेयंनिरूप्यविश्वेभ्योदेवेभ्यआषाढाभ्योजुष्टमितिचरुंनिरूप्यश्रपयेत्। आग्नेयेनप्रचर्य
विश्वेभ्योदेवेभ्यआषाढाभ्योनुब्रूहि। विश्वान्देवानाषाढान्यजेति। तन्नोविश्वेउपशृण्वंतुदेवाइत्य
नुवाक्या। अथुस्याःकन्याइत्यनुयाज्या। विश्वेषांदेवानामाषाढानामहंप्रप्रजयावेति। विश्वेभ्योदे
भ्यः स्वाहेतिचत्वारउपहोमाः। स्विष्टकृदादितर्पणांतासंतिष्ठते। ।तदानीमेव यः पुरस्तादित्यादि
ब्रह्मलोकाभिजयकामोऽभिजिन्नक्षत्रेष्ट्यायक्ष्यइतिसंकल्प्यः। आग्नेयंनिरूप्यब्रह्मणेऽभिजितेजुष्टं
निर्वपामि। इतिचरुंनिरूप्यश्रपयेत्। अनुमत्यैनिर्वापादिसमानमाग्नेयप्रचारात्। ब्रह्मणेऽभिजि
तेनुब्रूहि। ब्रह्माणमभिजितंयजेति। यस्मिन्ब्रह्माभ्यजयत्सर्वमेतादित्यनुवाक्या। उभौलोकौब्र
ह्मणासंजितेमाइतियाज्या। ब्रह्मणोऽभिजितोऽहंप्रप्रजयावेति। ब्रह्मणेस्वाहेत्यादिचत्वारउपहो
माः। स्विष्टकृदादितर्पणांतासंतिष्ठते। ।श्वोभूतेप्रातरग्निहोत्रंकृत्वा यः पुरस्तादित्यादिश्रो

कृण्वी

णा नक्षत्रेष्ट्या यक्ष्ये। पुण्यं श्लोकं शृण्वन्तं यन्मां पापी कीर्तिरागच्छेदिति संकल्प्य। आग्नेयं नि
२५ रुप्य विष्णवे श्रोणायै जुष्टं निर्वपामीति पुरोडाशं निर्वपेत्। कपालोपधानकाले त्रीणि कपालान्युप
धाय पुरोडाशमधिश्रयणादि समानमाग्नेयप्रचारात्। विष्णवे श्रोणायाऽनुब्रूहि। विष्णुं श्रोणां
यजेति। शृण्वन्ति श्रोणाममृतस्येत्यनुवाक्या। त्रेधा विष्णुरिति याज्या। विष्णोः श्रोणायाऽहं
अन्नादो भूयासं। विष्णवे स्वाहेति चत्वार उपहोमाः। स्विष्टकृदादि तर्पणांता संतिष्ठते। ।श्वो
भूते प्रातरग्निहोत्रं कृत्वा यः पुरस्तादित्यादि समानानां मध्यगामित्वकामः श्रविष्ठानक्षत्रेष्ट्या
यक्ष्य इति संकल्प्य। आग्नेयं निरुप्य वसुभ्यः श्रविष्ठाभ्यो जुष्टं निर्वपामीति पुरोडाशं निरु
प्य कपालोपधाने ष्टाकपालमुपदध्यात्। समानमाग्नेयप्रचारात्। वसुभ्यः श्रविष्ठाभ्योऽनुब्रूहि।
वसून् श्रविष्ठा यजेति। अष्टौ देवा इत्यनुवाक्या। यज्ञं नः पान्तु वसव इति याज्या। वसूनां श्रविष्ठा
नामहं अन्नादः। वसुभ्यः स्वाहेत्यादि चत्वार उपहोमाः। स्विष्टकृदादि तर्पणांता संतिष्ठते। । २५
श्वो भूते प्रातरग्निहोत्रं कृत्वा यः पुरस्तादित्यादि शतभिषङ् नक्षत्रेष्ट्या यक्ष्ये। दृढो शिथि

लं स्यामिति संकल्प्य। आग्नेयं निरुप्य वरुणाय शतभिषजे भ्यो जुष्टं निर्वपामीति। व्रीहिनि भेषजे
र्वापः। कपालोपधानकाले दश कपालान्युपदधाति। समानमाग्नेयप्रचारात्। वरुणाय शतभिषजे भेषजे
भेषजानि भ्योऽनुब्रूहि। वरुणं शतभिषजं यजेति। क्षत्रस्य राजा वरुणोऽधिराज इत्यनुवाक्या। यज्ञं नो राजा वरु
ण इति याज्या। वरुणस्य शतभिषजो भेषजानामहं धर्मभाग्भूयासं। वरुणाय स्वाहेत्यादि त्रय
उपहोमाः। स्विष्टकृदादि तर्पणांता संतिष्ठते। ।श्वो भूते प्रातरग्निं हुत्वा यः पुरस्तादित्यादि
ना तेजस्वी ब्रह्मवर्चसकामः पूर्वप्रोष्ठपदा नक्षत्रेष्ट्या यक्ष्य इति संकल्प्य। आग्नेयं निरुप्य अजा
यैकपदे प्रोष्ठपदेभ्यो जुष्टं निर्वपामीति चरुं निरुप्य श्रपयेत्। अनुमति निर्वापादि समानमाग्नेय
प्रचारात्। अजायैकपदे प्रोष्ठपदेभ्योऽनुब्रूहि। अजमेकपादं प्रोष्ठपदान्यजेति। अज एकपादुदगात्पु
[illegible] इति याज्या। अजस्यैकपदः प्रोष्ठपदानामहं प्रजया [illegible] इति। अजायैकपदे स्वा
हेत्यादि चत्वार उपहोमाः। स्विष्टकृदादि तर्पणांता संतिष्ठते। ।श्वो भूते प्रातरग्निहोत्रं कृत्वा यः

पुरस्तादित्यादि प्रतिष्ठाकाम उत्तरप्रोष्ठपदानक्षत्रेष्ट्या यक्ष्य इति संकल्प्य । आग्नेयं निरूप्य अह
२० र्बुध्नियाय प्रोष्ठपदेभ्यो जुष्टं निर्वपामीति पुरोडाशं निर्वपेत् । कपालोपधानकाले एकं कपालमा
ग्नेः भस्मेकपरिविलिख्यांगारमध्ये वर्त्तयति । आदेवयजं वहेति लिखितस्थानं । ध्रुवमसि पृथि
वीमित्यभिमृशति अंगारैरभिवासयति घर्मणामंगिरसामिति एककपालवर्त्तं प्रकारः तस्मि
६५ न्नेककपाले पुरोडाशमधिश्रयति समानमाग्नेयप्रचारात् । अहये बुध्नियाय प्रोष्ठपदेभ्योनु
ब्रूहि । अहिर्बुध्नियं प्रोष्ठपदानू यजेति । अहिर्बुध्नियः प्रथमन इत्यनुवाक्या । चत्वार एकमभिकर्म देवा
इति याज्या । अहिर्बुध्नियस्य प्रोष्ठपदानामहं ॰ प्रमानं प्रतिष्ठां गमेयं । अहये बुध्नियाय स्वाहेति
इत्यादि त्रय उपहोमाः । स्विष्टकृदादि संतिष्ठते । । श्वोभूते प्रातरग्निहोत्रं हुत्वा यः पुरस्तादित्या
दि पशुकामो रेवतीनक्षत्रेष्ट्या यक्ष्य इति संकल्प्य । आग्नेयं निरूप्य ॰ पूष्णे रेवत्यै जुष्टं निर्वपामी
ति चरुं निरूप्य श्रपयेत् । समानमाग्नेयप्रचारात् । पूष्णे रेवत्यै अनुब्रूहि । पूषणं रेवतीयजे १७
ति । पूषा रेवतीत्यनुवाक्या । क्षुद्रान्पशूनरनीति याज्या । पूष्णो रेवत्या अहं पुष्टिमान्पशुमान्भूयासं॰

यमस्यापभरणी नामहं ॰ प्रप्रजयावेति । यमाय स्वाहेत्यादि चत्वार उपहोमाः । स्विष्टकृदादि तर्प
१८ णांता संतिष्ठते । अथ तदानीमेव यः पुरस्तादित्यादि कामावाप्तिकामः अमावास्यामाज्येन ह
विषा यक्ष्ये इति संकल्प्य । आग्नेयं निरूप्याधिश्रित्याज्यं निरूप्यानुमत्यै चरुं अधिश्रयति इत्या
दि समानमाग्नेयप्रचारात् । ध्रुवाज्या चतुर आज्यस्य गृहीत्वा न अमावास्यायै स्रुक्पांशु अनुब्रू आ६४
हीत्युक्त्वा अमावास्यामित्युपांशु यजेत्युक्त्वा । निवेशनी संगमनीत्यनुवाक्या । यत्ते देवा अदधु
रिति याज्या । हविरसीत्यनुमंत्रणं । अमावास्यायै निवेशनी संगमनीत्य॰ स्वाहेत्यादि त्र
य उपहोमाः । स्विष्टकृदादि तर्पणांता संतिष्ठते । । श्वोभूते प्रातरग्निहोत्रं कृत्वा यः पुर
स्तादित्यादि इष्ट्या यक्ष्ये । अहोरात्रानर्धमासान् (मासा) ऋतून्संवत्सरं मासि चन्द्रमसः सायुज्यं सलोक
तामाप्नुयामिति संकल्प्य । । आग्नेयं निरूप्य चन्द्रमसे प्रतीदृश्यायै पुरोडाशं पंचदशकपालं निर्वपे निर
त् । कपालोपधानकाले पंचदशकपालान्युपदध्यात् । अहानि हविरासादनांतं कृत्वा उद्यते चन्द्र २८

पूष्णेस्वाहेत्यादित्रयउपहोमाः। स्विष्टकृदादितर्पणांतासंतिष्ठते। ।श्वोभूतेप्रातरग्निहोत्रं
कृत्वायाःपुरस्तादित्यादि अश्वयुजोनक्षत्रेष्यायक्ष्ये। श्रोत्रस्विअबधिरोभवेयमितिसंक
ल्पः। आग्नेयंनिरूप्य। अश्विभ्यामश्वयुग्भ्यांजुष्टंनिर्वपामीति। पुरोडाशंनिरूप्यकपाला
द्वेकपाले। पधानकालेद्वैउपदध्यात्। यघर्मेकपालउपरिन्वंतिवेधसः। पूष्णस्तेअपिव्रतइंद्र॰इतिसमानमाग्नेय
प्रचारात्। अश्विभ्यामश्वयुग्भ्यामनुब्रूहि। अश्विनावश्वयुजौयजेति। तदश्विनावश्वयुजाविस्य
नुवाक्या। यौदेवानामितियाज्या। अश्विनोरश्वयुजोरहंदेव॰इंद्रियाव्यन्नादः। अश्विभ्यांस्वाहे
त्यादिद्वेत्वारउपहोमाः। स्विष्टकृदादितर्पणांतासंतिष्ठते। ।श्वोभूतेप्रातरग्निहोत्रंकृत्वायाःपुर
स्तादित्यादिसमानानांराज्यकामोभरणीनक्षत्रेष्यायक्ष्येइतिसंकल्पः। आग्नेयंनिरूप्ययमायाप
भरणीभ्योजुष्टंनिर्वपामीतिचरुंनिरूप्यश्रपयेत्। समानमाग्नेयप्रचारात्। यमायापभरण
ीभ्योनुब्रूहि। यममपभरणीर्यजेति। अपपाप्मानंभरणीरित्यनुवाक्या। यस्मिन्नक्षत्रइतियाज्या

मस्मिप्रचरेत्। आग्नेयेनप्रचर्यचंद्रमसेप्रतीदृश्यायाअनुब्रूहि। चंद्रमसंप्रतीदृश्यांयजेति।
नवोनवइत्यनुवाक्या। यमादित्याइतियाज्या। चंद्रमसःप्रतीदृश्यायाअहं॰अन्नादः। चंद्रमसेस्वा
हाप्रतीदृश्यायैस्वाहा। इत्यादिसप्तउपहोमाः। स्विष्टकृदादितर्पणांतासंतिष्ठते। ।श्वोभूतेया
पुरस्तादित्यादिइष्ट्यायक्ष्येइत्यहोरात्रेभ्यःयंनमामहोरात्रेआनुयातामितिसंकल्पः। आग्ने
यंनिरूप्याहोरात्राभ्यांजुष्टंनिर्वपामीतिशुक्लकृष्णव्रीहीन्संमिश्रान्निर्वपेत्। अनुमत्यैकानि
वीपायाधिश्रयणकालेसवत्स्योःपयसिचरुंश्रपणंमृतवत्साजीववत्सावेवत्सेनैकेनदुह्यतेतस्य
वासोतयोरेकाकृष्णान्याश्वेतातयोःपयसिचरुंश्रपयेत्। आनुमतस्यचरोरेकस्यश्रपणंसर्वत्र
अहानिहविरासादनांतंकृत्वाअस्तमितेप्रचरेत्। अपिवाअहोरात्रयोःसंधावेवनिर्वपेत्। सं
धावेवप्रचरेदिति। संधौनिर्वापप्रचारौवा। समानमाग्नेयप्रचारात्। अहोरात्राभ्यामनुब्रूहि।
अहोरात्रेयजेति। येविरूपेसमनसेत्यनुवाक्या। वयंदेवीब्रह्मणेतियाज्या। अहोरात्रयोरहं

प्रप्रजयावेति। अङ्के स्वाहेत्यादित्रय उपहोमाः स्विष्टकृदादितर्पणांता संतिष्ठते। ।तस्या एव रात्र्या
श्चतुर्थे भागे याः पुरस्तादित्यादि इष्ट्या यक्ष्ये। समानानां सुभगः प्रियः स्यामिति संकल्पः। आग्ने
३८ यं निरूप्य उषसे जुष्टं निर्वपामीति चरुं निरूप्य अनुमत्यै चरुनिर्वापात् समानमाग्नेयप्रचारात्।
उषःकाले आग्नेयेन प्रचर्य उषसेनुब्रूहि उषसं यजेति। प्रत्यु अदर्श्यायतीत्यनुवाक्या। उदुश्रिया उषसः
र्वतेति याज्या। उषसोहं प्रप्रजयावेति उषसे स्वाहेत्यादि पंचोपहोमाः। होमकाले त्वेवाग्निषु
अग्निहोत्रहोमः। स्विष्टकृदादितर्पणांता संतिष्ठते। ।श्वोभूते याः पुरस्तादित्यादि इष्ट्या यक्ष्ये
मनुष्याणां तेजस्वी भवेयामिति संकल्पः। आग्नेयं निरूप्य नक्षत्राय जुष्टं निर्वपामीति निर्वपे
त्। निर्वापकाले यजमानो जपति। यथा त्वं देवानामसीति। अनुमत्यै चरुनिर्वापात् समानमा
ग्नेयप्रचारात्। अहनि हविरासादनांतं कृत्वा उदिते पुनः नक्षत्रेषु प्रचारः होमकाले त्वेवाग्नि
होत्रहोमः। आग्नेयेन प्रचर्य। नक्षत्रायानुब्रूहि। नक्षत्रं यजेति। तं नो नक्षत्रमर्चिवो हृत्य ३८
नुवाक्या। प्रनक्षत्राय देवायेति याज्या। नक्षत्रेस्याहं प्रप्रजयावेति। नक्षत्राय स्वाहेत्या

दित्रय उपहोमाः। स्विष्टकृदादितर्पणांता संतिष्ठते। ।तस्य रात्र्यास्तृतीये भागे याः पुरस्तादि
त्यादि इष्ट्या यक्ष्ये। समानानां प्रतिष्ठा स्यामिति संकल्पः। आग्नेयं निरूप्य। सूर्याय नक्षत्रेभ्यो जु
ष्टं निर्वपामीति। चरुं निर्वपेत्। अनुमत्यै निर्वापात् समानमाग्नेयप्रचारात्। उदयात् पूर्वं हविरा
सादनांतं कृत्वा उदिते आदित्ये प्रचारः। उदयानंतरमग्निहोत्रं हुत्वा आग्नेयेन प्रचर्य सूर्याय नक्ष
त्रेभ्योनुब्रूहि। सूर्यं नक्षत्राणि यजेति। उदुत्यं जातवेदसमित्यनुवाक्या। चित्रं देवानामिति याज्या।
सूर्यस्य नक्षत्राणामहं प्रप्रजयावेति सूर्याय स्वाहेति त्रय उपहोमाः। स्विष्टकृदादितर्पणांता
संतिष्ठते। ।तस्मिन्नेवाहनि अस्तं यते याः पुरस्तादित्यादि अस्यां भूमौ प्रतिष्ठाकामः। आदि
त्या यक्ष्ये इति संकल्पः। आग्नेयं निरूप्य। अदित्यै जुष्टमिति चरुं निरूप्य अनुमत्यै निर्वा
पात् समानमाग्नेयप्रचारात्। अदित्या अनुब्रूहि। अदितिं यजेति। अदितिर्न उरुष्यत्वित्यनु
वाक्या। महीमूषु मातरमिति याज्या। अदित्या अहं अंहोमुच्यमिति प्रप्रजयावेति वा। अ सा
दित्यै स्वाहा प्रतिष्ठायै स्वाहेति द्वावुपहोमौ स्विष्टकृदादितर्पणांता संतिष्ठते। ।अथश्वो

भ्रतेप्रातरग्निहोत्रं हुत्वाथाः पुरस्तादित्यादिश्यायस्थे प्रतिष्ठां गच्छेयमिति संकल्पः।
२० आग्नेयं निरूप्याविष्णवे जुष्टमिति चरुं निरूप्यानुमत्यै निर्वापादि समानमाग्नेयस्य त्वाराद्
विष्णवेनुब्रूहि। विष्णुं यजेति। इदं विष्णुरित्यनुवाक्या। प्रतद्विष्णुरिति याज्या। विष्णोरहं प्र
जयावेति। विष्णवे स्वाहेत्यादि त्रय उपहोमाः। स्विष्टकृदादि तर्पणांतां संतिष्ठते। एवमोप
न वसथ्येन सह नक्षत्रदर्विर्भ्यो द्वात्रिंशदहानि भवंति। नक्षत्रसत्रमध्यपातिन्यो दर्शपौर्ण
मासेष्टी स्वस्वकाले कर्तव्ये। नातिक्रमितव्ये सत्र समाप्त्यनंतरं पशुनेष्ट्वा अतिपन्नप्रायश्चि
त्तार्थं पाथिकृतीमिष्टिं कृत्वातिक्रांतदर्शपौर्णमासेष्टी कुर्यात्। नक्षत्रसत्रेणेष्ट्वा पापं निर्णु
द्य ज्योतिष्मत्सुपपद्यते। अपपुनर्मृत्युं जयतीति। ॥ इति नक्षत्रसत्रं समाप्तं॥ ॥अ
थ चातुर्मास्यानां प्रायश्चित्तानि। चातुर्मास्यानां चत्वारः प्रयोगपक्षाः। यावज्जीवं। सांव २७

त्सरिकः द्वादशाहः। यथाप्रयोग इति तत्र यावज्जीवसांवत्सरिकपक्षे फाल्गुन्यां चैत्र्यां वा
पौर्णमास्यां वैश्वदेवपर्वप्रयोगं कुर्यात्। आषाढ्यां श्रावण्यां वा पौर्णमास्यां वरुणप्रघासैः कुर्या प्रयोगं२
त्। कार्तिक्यां मार्गशीर्ष्यां वा पौर्णमास्यां साकमेधप्रयोगं कुर्यात्। फाल्गुन्यां चैत्र्यां वा शुना
सीरीयप्रयोगं कुर्यात्। चतुर्णामपि पर्वणां मुख्यः कालः। चातुर्मास्यानां प्रथमे प्रयोगे संकल्पा
त्पूर्वं अनालंभकायां विरम्य कालांतरे कुर्यात्। प्रथमे प्रयोगे संकल्पादूर्ध्वं कर्मारंभात्पूर्व
मनालंभकायामपि विरम्य कालांतरे कुर्यात्। अन्वाधानादूर्ध्वं चेदपकृष्य समापनं। द्विती
यादिप्रयोगेषु संकल्पादूर्ध्वं अनालंभकायामपकृष्यैवान्वाधानादि कर्म कुर्यात्। अन्ये तु प्र
थमप्रयोगेपि संकल्पादूर्ध्वमनालंभकायां अन्वाधानप्रभृत्यपकृष्यैव समापयेदित्याहुः।
वैश्वदेवपर्वयागे कृते वरुणप्रघासादिष्वनारब्धेष्वपि पत्न्यामनालंभकायां वैश्वदेवारंभेण
तेषामप्यारब्धत्वात्स्वस्वकाले वरुणप्रघासाद्याः अपकृष्यैव कर्त्तव्याः। चातुर्मास्यानां पूर्वो

आशुनासीरीयस्य कालात् साकमेधानां गौणः कालः

स्तोऽमुख्यः कालः गौणकाले वरुणप्रघासादीनां कालात् वैश्वदेवस्य गौणः कालः आसा
२२ कमेधानां कालात् वरुणप्रघासानां गौणः कालः आवैश्वदेवस्य कालात् शुनासीरीयस्य
गौणः कालः। अनापदि गौणकाले वैश्वदेवादीन् कुर्वन् यथोक्तप्रायश्चित्तं कृत्वा कुर्यात्। प्राय
श्चित्तं व्रातपतीष्टिः। आपदि गौणकालेऽपि कुर्वन् प्रायश्चित्तं न कुर्यात्। गौणकालेऽप्यतिक्रांते प्रा
यश्चित्तं कृत्वातिपन्नं वैश्वदेवपर्वादि कुर्यात्। चातुर्मास्यैः षण्मासान् यदि न यजेत् तदाग्नये प
थिकृत इत्यादि अग्निहोत्रातिपादनोक्तां चतुर्दविषमिष्टिं कृत्वातिपन्नं वैश्वदेवपर्वादि कुर्या
त्। चातुर्मास्यानि संवत्सरपर्यंतमकृतानि चेत् तदाग्नये पवमानायेत्यादिकामग्निहोत्रातिपाद ति
नोक्तां सप्तहविषमिष्टिं कृत्वा अतिपन्नानि वैश्वदेवादीनि पर्वाणि कुर्यात्। । अथ चातुर्मास्या
नामंतरालव्रतान्युच्यंते। व्रतं चरेदिति तस्यैतद्व्रतमितिमानसंकर्मोच्यते तत्र व्रत्यातिवृत्तिलक्ष
णं। । अनृतं न वदिष्यामीत्यादिना नृतं वदति न मांसमश्नाति न स्त्रियमुपैति सवर्णा यातीं कां रि
सात्रियादि स्त्रियं नोपेयात् क्षारादिना वा स्नानपल्पूलयेत्। मृन्मयपात्रेण न पिबेत्। शूद्रायोच्छिष्टं २२

नदद्यात्। स्वयं पादौ प्रक्षालयेत्। न लवणमश्नाति। तिलेभ्योन्यत् मुद्गादिकोशीधान्यं न भक्षयेत्।
नास्तंघां शयीत। न स्वैवर्णां स्त्रियं नोपेयात्। अजातपुत्रश्चेत् कामं ऋतौ जायामुपेयात्। उभयोः कालयो पार
र्व्रतपूर्वं हविष्यमश्नीयात्। न क्षौद्रं मधु मश्नीयात्। अन्यस्यार्त्विज्यं न कुर्यात्। नांजीत। नाभ्यंजीत।
नेत्राद्यं क्तं जीत। न लोमानि वपेत्। न नखानि निकृंतेत। पर्वांते केशश्मश्रूणि वापयीत। संवत्सर
प्रयोगे संवत्सरमेतद्व्रतं चरेत्। यावज्जीवप्रयोगे विसंवत्सरमेतद्व्रतं चरेत्। संवत्सरादूर्ध्वं व्रतपती
मिष्टिं कृत्वा तदूर्ध्वं दार्शपौर्णमासिकमेव व्रतं चरेत्। यथाप्रयोगं द्वादशाहं यावत्प्रयोगं व्रता
चरणं। चातुर्मास्यांतरालव्रतातिक्रमे व्रातपतीष्टिः प्रायश्चित्तं वैश्वदेवादिपर्वणां स्वकालाति
क्रमे अनापदि गौणकालात्ययेऽपि व्रातपतीष्टिः प्रायश्चित्तं ८ । इति प्रायश्चित्तप्रदीपे चा
तुर्मास्यप्रायश्चित्तानि संपूर्णानि ॥ ॥ अथ पशुप्रायश्चित्तान्युच्यंते ॥ ८

श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः

र्थाग्निषु होमात् पूर्वमनुगतेषु पुनः प्रणीय होत्रादीनामन्यतमेन प्रायश्चित्तं कृत्वा षड्ढोतृहोमः

श्रीगणेशाय नमः ॥ अथ पशुप्रायश्चित्तान्युच्यन्ते ॥ पशोः प्रथमप्रयोगे संकल्पादूर्ध्वं कर्मारंभात्प्रा
र्वं पत्न्यामनालंभुकायां प्रयोगमुत्सृज्य कालांतरे पशुं कुर्यात् । अन्वाधानादूर्ध्वमनालंभुकाया
म परुध्य समापयेत् । द्वितीयादिपशुप्रयोगे संकल्पादूर्ध्वं अनालंभुकायामपरुध्यैवान्वाधानप्रभृ
ति प्रयोगं समापयेत् बहुपत्नीकस्याप्येतत् । अन्ये तु प्रथमप्रयोगेपि संकल्पादूर्ध्वमनालंभुकाया र्थाग्निषु
२२ म् अन्वाधानप्रभृति अपरुध्य समापयेदित्याहुः । षड्ढोतृहोमादि कुर्यात् । अन्वाधानादूर्ध्वम
ग्निष्वनुगतेषु पुनः प्रणीय होत्रादीनामन्यतमेन प्रायश्चित्तं कुर्यात् कृत्वा पुनरन्वाधाय व्या
हृतिभिरुपतिष्ठेत अग्निप्रणयनानंतरं उत्तरवेद्यग्नावनुगते आहवनीयात्पुनः प्रणीय उत्त
रवेदिके सप्तहोतारं हुत्वा आहवनीये द्व्यात्मकं जुहुयात् ॥ उत्तरवेदिप्रणयनानंतरं आ
हवनीयेनुगते भस्मसमारोपणाद्यावृतामथित्वाहवनीये निधाय तत्र सर्वान्होतॄ २२

न् जुहुयात् ॥ पुनः गार्हपत्येनुगते भस्मसमारोपणाद्यावृता मथित्वा पुनः गार्हपत्ये निधाय त
त्र सर्वान्होतॄन् जुहुयात् ॥ दक्षिणाग्नावनुगते पुनः गार्हपत्यात्पूर्ववदाहृत्य निधाय दक्षिणा
ग्नौ पुनः गार्हपत्ये च व्यस्तसमस्तव्याहृतीर्जुहुयात् ॥ उल्मुकाग्नावुद्धाते पूर्ववदुत्साद्य उ
ल्मुकाग्नावुत्तरवेदिके च व्यस्तसमस्तव्याहृतीर्जुहुयात् ॥ पशुपाकरणकाले उक्तलक्षणं कूटा
दिदोषरहितं उक्तजातिरूपवर्णयुक्तं पशुमुपाकुर्यात् ॥ कूटादिप्रतिषेधः कैश्चिदुक्तः स उ
च्यते ॥ एकशृंगरहितः कूटः स्यात् अकर्णश्च खंडितकर्णः काणश्चक्षुर्विहीनोयः कूटाकर्णौ त
था काणः खंडः पंडुस्तथैव च ॥ श्रोणः सप्तमः पशुश्चेति तेषां लक्षणमुच्यते । एकशृंगरहितः कू
टः स्यात् । अकर्णः खंडितकर्णः काणश्चक्षुर्विहीनोयः खंडो यो भग्नदंतकः पुंस्त्ववि
हीनः स्यात् द्विपि विट्टो यथा भवेत् । छिन्नपुच्छोथवा । श्रोणः स्तनो बधिर एव च । सके स

२

मनापकृच्छ्राश्चापियस्मात्कृतन्नखुरः पशुः कृष्णवर्णाद्यभावे च प्रतिषिद्धगुणेपि च। प्रायश्चित्तं
२३ हुत्वा तमेवोपाकुर्यात्। तथा च भरद्वाजः अंगहीनोपि पशुः प्रतिनिधेर्वल्लीयान् इति। पशुः
कृवर्णरूपगुणविहीनश्चेद् उपाकरणात्पूर्वं प्रायश्चित्तं जुहुयात्। रोहितो धूम्ररत्या पशु
वर्णास्तु चोदिताः। लपरः पुनरुत्सृष्ट इति तृपारिमन्यते। त्र्यविर्दित्यवाह् इदं चाविकित्र
संस्थतुर्यवाह् षष्ठवाह् ऋषभो धेनुर्वशानड्वान् तथोक्षकं। वयांस्येतानि कथ्यन्ते तेषां लक्ष
णमुच्यते। षाण्मास्यस्त्रिय विज्ञेयो दित्यवाह् द्विमिस्मृतः। एवं षण्मासादिवृध्युक्तान्वदान
ध्यर्थपंचमान्। उपाकरणात्पूर्वं जुहुयात्सकृद्गृहीतेन पंचभिर्मंत्रैर्जुहुयात्। अग्नि
र्मूर्धा दिवः अग्ने विद्धि सजोषसा। इंद्र विश्वा अवीवृधन्। वायोशतं हरीणां। प्र २३
यते न त्वदिति हुत्वा तमेवोपाकुर्यात्। उपाकृतः पशुर्यदि शब्दं कुर्यात्। तदा यद

स्य पोरसन्नसद इति जुहुयात् सकृद्गृहीतेन हुत्वा नैमित्तिकी दूती पां। यस्माद्भीषा वा शिश्यारंति। तती
यायरथमकृ इति जुहुयात्। वेपनादिषु सर्वत्र यदस्य पार इति प्रथमा यदद्य न भक्षिरिति तती
श्री यानैमित्तिं मध्यमा भवति। पशोर्वेपने यस्माद्भीषा वेपिष्ठाः पलायने यस्माद्भीषा पला
यिष्ठाः संस्राकरणे यस्माद्भीषा स्तमलाष्ठाः मानसेपि मरणे भवति। शब्दकरणे यस्मा
द्भीषा शब्दकृथाः दकृथाः मूत्रकरणे यस्माद्भीषा मूत्रमकृथाः निषीदने यस्माद्भीषा न्यष
दः इति हुत्वा तं मैत्रावरुणदंडेनोत्थापयते। अन्यनोड्डुवरंदंड नवीगोत्व उद्रुस्नाति ष्ठेति
अभ्यश्चेद्धुच्छागेति मे पश्चेत उन्मयेति। वरुणवेद्रूहरेति। एवं सर्वत्र पशुशब्दस्था
ने ऊहः। उपाकृतः पशुः प्राक्पर्यग्निकरणाद्यदि म्रियेत तत्र प्रायश्चित्तं पशुपुरो
डाशेन सहनिमित्त वर्णेनेतानिर्वपेत्। वायुग्रहणनिमित्तामम्। नित्श्वेदेवं चरुं निर्वपेत्।
अक्षिनासासिस्राववैर्मरणेपौष्णं चरुं निर्वपेत्। अप्सुमरणे वारुणं चरुं निर्वपेत्॥

अधत्वान्मतश्चे सौर्यंचरुं निर्वपेत् • पशौ विनष्टे वायव्यं चरुं निर्वपेत् • एतानि हवींषि विनि
मित्तवशाद्भवंति • सर्वप्रायश्चित्तेनैव निमित्तेन हवींषि निर्वपेत् • आग्नेयमष्टाकपालं
सौम्यं चरुं सावित्रमष्टाकपालमिति • त्रिहविरिष्टिमिष्टिमरणानंतरं कुर्यात् • इत्यापस्तंब
लिसंकल्प्यः • आग्नेयमष्टाकपालं सौम्यं चरुं सावित्रमष्टाकपालमिति निर्वपेत् • अग्नि
र्मूर्धा दिवः ककुत्पतिरित्याग्नेयस्य • त्वं नः सोम या ते धामानीति सौम्यस्य • तत्सवितुर्वरेण्यं
अभित्यं देवं सवितारमिति सावित्रस्याग्नेरहमन्नादः सोमस्याहं प्रजया चेति सवितुरहं स्वस्ति
मानहं • तत्र मध्यमपालिना कपालेनाष्टाविंशस्य यागः पुनरालंभनं वेति केचित् • अन्यं पशुं तज्
जातिवयोवर्णरूपादिभिः पूर्वपशुसदृशं तस्ये देवतायै उपाकुर्यात् • तस्योपाकरणादिद्रव
व्यसंस्कारार्थं कर्म सर्वमावर्तते • आरादुपकारकाणि • निर्मंथ्य सामिधेन्यादि आघारौ प्रवरं च अग्नि
संमार्जनं प्रयाजादीनि वर्तयेत् • यदि तज्जातीयं न विंदेत् पालनिषिद्धान्यत्पशुमुपाकुर्यात् • अजाव
येगो अश्वा परस्परान्यस्य प्रतिनिधयो भवंति प्रतिनिधिश्च तद्रूपात् तद्वर्णादियुक्तो भवेत् • तत्प्रतिनिधि

भागे छागं वा मेषं वोपाकुर्यात् • छागमेषयोरभावे आज्येन समापयेत् • ध्रुवाज्याच्चतुर्गृहीतेन नव
पापुरोडाशहविषां स्थाने यजेत् • स्विष्टकृतं चाज्येनेत्याहुः • माधवप्रभृतयो ध्रुवाज्यादुपयजर्थान् लज्जाघन्यापव
दाने ध्रुवाज्यात्सर्वाशेषं समापयेत् • एवमाज्येन पशुं समाप्य पुनर्यागः कर्तव्यः मृतस्य शरीरं अ
प्सु प्रवेशयेत् • नवा कुरतन्निरुप्से • आहवनीयाद्वा दूरपालेभ्यः • विश्वा आशा मधुना संसृजामीति
त्रिभिः आच्छिद्य मांसानां वपापश्येनोपहरेत्तद्वपान्तरेण हो • जुह्वां हिरण्यशकलं निधाय ध्रुवाज्याच्च
तुर्गृहीत्वा यजमानेनान्वारब्ध आहवनीये जुहोति • धन्वसूप राणो न दिमान्तिः सर्वमिति वपास्थान
ने यत्किंचिन्मेदः रूपमवशिष्टं स्यात्तदुत्साद्य तेन वपास्थाने यजेत् • तदभावे आज्येन यजेत् • यदि लभे
वपा पुनर्विंदित तेनैनामाद्रियेत् • पशोरवदानिस्वं देहे बहुनि वा नश्येत् • नष्टावदानस्थाने ध्रुवाज्यम
वदाय यजेत् • अल्पांगनाशे आज्येन यागे कृते न पुनर्यागः • भूयांगनाशे आज्येन समाप्य पुनर्यागः
कर्तव्यः यदि न पाहविरवदानं वा हुतमहुतं वा स्कंदेत् स्कन्नावदानमादाय • आवाद देवस्ता चौषपरा
से हे भूमि मन्गादित्य एवं प्रक्षिप्यान्यां स्कंदं व्रक्षाल्युत्सादप्यपिवा प्रोक्ष्य तस्यां च आतमाने हिरण्यं निधाय
ध्रुवेस्तव्यचो सहस्कालिंगेनेनर्द आपूर्ववद्गृहीत्वा हिरण्यमश्वमवघ्राप्य षष्ठदाश्यमवम्हर्णीसा

दपि स्वाभ्रायुर्म इत्यभिमंत्र्य दुर्गादि गणान् हुत्वा शतमानं हिरण्यं अध्वर्यवे दद्यात् । यूपे छिन्ने भिन्ने द
२५ ग्धे अग्ने स्तुना भ्राते यूपस्य भेदा दोषज्ञाना दि नाशे च पाले वेनं विधिः ॥ अन्यं यूपं तज्जातीयं तत्सदिमा
णं पूर्वानुत्यादिना पुनरुत्साद्य स्वस्थाने निधायाभिमंत्रयते । भ्रातायुर्मे धारयते तिदुष्टं एवमाहव
नीयेनु प्रहरेत् । भूमिर्भूमिमगादिति दुर्गादि गणां प्रायश्चित्तं जुहुयात् । रशना वपाश्रपणी हृदय
शूल स्वरु शास उपाकरणा दर्भ प्लक्ष शाखादीनां छेद दाहो पघाते पुनादो विना शे वा । अ
न्यं तज्जातीयं तत्परिमाणं तद्रूपमुत्साद्य प्रोक्ष्य तत्स्थाने निधायाभिमंत्र्य । अध्वर्युभूतेभ्य
स्वाहेति दुर्गादि गणां जुहुयात् । पशु दाय्य ग्रहणानंतर स्काली गत पशवदाऽपस्कं दनेपव
मेव प्रायश्चित्तं । पशुर्यदा पादाभ्यां मूर्धं तिष्ठति तदा । ऊर्ध्वं कृणुष्व ऊतये ऊं खोनः पाह्ये हस्त
इति द्वाभ्यां पशुमभिमंत्र्य सर्व प्रायश्चित्तं जुहुयात् । यदि पशुः पाय्यमानमुदकं नैव पिबेत् तदा
नवोद्द्रशतन्त्रिय यत इति पाययेत् । पशुं गेषु अग्न्यमारोपणेषु यद्यश्रु स्वास्त्रवेत् । तामभिमंत्रयेत् ।
गंभीर्यवंतम गदमकरिति सर्व प्रायश्चित्तं हुत्वा कार्यं समाचरेत् । तस्यामेव अपयदश्रमावेत् । २५

अन्यां कुंभीमादाय सो प्रोक्ष्य तत्स्थाने निधाय भ्रायुर्म इत्यभिमंत्र्य तस्यामंगानि प्रक्षिप्य श्रपयेत् । भि
न्नां कुंभीं भूमिर्भूमिमगादित्यप्सु प्रक्षिपेत् । वसायां नष्टानैयां अवदानेषु दके सिक्ता वसा क्षारयि
त्वा सर्व प्रायश्चित्तं हुत्वा तयाव साहोमं कुर्यात् । जाघन्या नाशे लौकिक जाघनी क्रीत्वा तया पत्नी
याज कर्तव्यः । सर्व प्रायश्चित्तं जुहुयात् । दृष्टाज घनी नाशे आज्येनैव पत्नी संयाजान् कृत्वा
सर्व प्रायश्चित्तं जुहुयात् । उपयाज या गार्थ गुदनाशे वसाहोम हवन्या सक्तसह गृहीतायेनर
कादशाक्तेो जुहुयात् सर्व प्रायश्चित्तं च । परिगृहीतो यूपो यदि सुषिरः स्यात् । तदाग्निसा रेलाय
जमानो म्रियेत तदेदं प्रायश्चित्तं कर्तव्यं । दृष्ट विद्ध विचक्रमे भूते व, सुव, प्रजापतेन
त्वदि तिन्त्र भिर्मंत्रै राज्येन हुत्वा सुषिरं यूपं छित्वा आहवनीये प्रक्षिपन्त्यं यूपं पूर्वानुत्यादि ५
आहृत्य तत्स्थाने निधायाभिमंत्रयते । भ्रातायुर्म इति ॥ यदि यूपो वृक्षादिभिर्न क्षि
तोऽभवेत् तदा यजमानः क्रीमि भिन्न क्षितो भवति ॥ तदा पूर्ववादिर्वा विधुरित्यादि
भिर्मंत्रै हुत्वा दुष्ट यूप माहवनीये प्रक्षेपणादि अभिमंत्रणांतं कुर्यात् । छिन्नो यूपो

५

यदि स्वमूल एव पतितस्तदा वैष्णवीमृचं विहायाहुतिद्वयं हुत्वान्यं यूपं पूर्ववदाचरेत्॥ छिन्नो
यूपो यदि दक्षिणस्यां दिशि पश्चिमां वा हरेत् दक्षिणाग्रः पश्चिमाग्रो वा पतेत्॥ छिन्नो
यूपो नश्येत् वा दग्धो वा स्यात् तस्य स्थाने यमादाधा
यूपो नश्येत् वा दह्येत स्तेनैर्वा अस्वास्थ्यो वा स्यात्तदा इदं विष्णुरित्यस्य स्थाने यमादाधा
९ रपृथिवीमित्याहुतिं हुत्वा व्याहृत्यां सर्वं पूर्ववत्कुर्यात्॥ यदि यूपो पूर्वं पतेत् तदा वैष्णव्या
स्थाने उद्रुत्तमं वरुणपाशमस्मादिति हुत्वा व्याहृत्यादि पूर्ववत्कुर्यात्॥ यदि यूपं जना
बलात्कारेण हरेयुस्तदा यजमानस्य धनहानिः स्यात् तदा वैष्णव्याः स्थाने इदं वोधि
ध्रौतस्परीति त्वा व्याहृत्यादि पूर्ववत्कुर्यात्॥ यदि यूपो मूले शुष्कः स्यात् यदि यूपो मध्ये संहृति
अग्रे वा शुष्कः स्यात् यूपे तस्य मारणाग्निष्ठाश्रि यदि स्रवति छिन्नो स्वस्थाने निदध्या
तं च प्रायश्चित्तमाज्येन जुहुयात्॥ यस्ते द्रप्सायस्कन्दत्वृङ्गिति॥ स्विष्टकृदर्थावदाने
स्कन्नमादाय तद्धरी यथास्थाने निधाय सर्वं प्रायश्चित्तं हुत्वा अधर्यवे वरं दद्यात्॥ २५

समासे पशुतंत्रे यदि स्वाकृतिश्च पाश उपविशेत्॥ चषालमुद्धृत्य प्रक्षाल्य यूपं प्रोप्य चषालं प्रतिमुच्य सक
ृद्धरीते नान्येन प्रायश्चित्तं जुहोति॥ आपवस्व वदस्वावा सोमपीत यह्न्ति॥ उपाकरणकाले आनी देवतां
विहाय अन्यस्यै देवतायै पशुमुपाकृतश्चेत् संतपनात्पूर्वमन्यदेवतायै उपाकृत इति तानि पशुत
दानीमेव तां देवतामुद्दिश्य त्यजेत्॥ दक्षिणया सह ब्राह्मणाय दद्यात्॥ इदं हुती च व्याहृतीश्च
हुत्वा आग्निन्यै देवतायै पशुं तरमुपाकुर्यात्॥ तस्यापि आराद्युपकारकाणि निर्मंथ्यादीनि वर्जये
त्॥ द्रव्यसंस्काररूपाणि उपाकरणादीनि आवर्तंते॥ संतपनाद्यूर्ध्वं स्विष्टकृतः पूर्वं आभागिन्यै उपा
कृत इति तानेस्मा गिन्यै तज्जातीयं पशुं तरमुपाकृत्य आभागिन्या उपाकृते पशुं उपाकृत्य स्था
ने यजेत्॥ इदं हुती च व्याहृतीश्च जुहुयात्॥ स्विष्टकृत ऊर्ध्वं स्मरणे आभागिनीमाज्येनेष्ट्वा
इदं हुती व्याहृतीश्च हुत्वा आमतेत्रं समाप्य आदित आरभ्य आग्निन्यै देवतायै पुन
५० र्यागः कर्तव्यः॥ उपाकृतं पशुमपहरेत्॥ यजमानः अपहर्तुरार्तिः स्यादिति यदि काम
येत तदाध्वर्युः कुविदंगयवमंतो यवं चिदिति त्वामित्रे सकृद्धरीते नाज्येन हुत्वान्यं प

अनुपाहृत्य यागं कुर्यात् ॥ सोमे वेदाग्नीध्रीये जुहुयात् • कतिपयानां पश्ववदानानां पूतिगंधो
त्पत्तौ गुह्योदकेन प्रक्षाल्य आज्येन सिक्त्वा पुनः श्रपयित्वा प्रचरेत् • अपरिहार्य पूतिगंधो सत्यो आ
ज्यस्य प्रत्यवदानमवदाय यागं कुर्यात् • सर्व हविषां पूतिगंधो सत्यो मिंदाहुती व्याहृतीश्च हुत्वा
२७ आज्येन समाप्य पुनर्यागः कर्तव्यः प्रधानयागे कृते पूतिगंधो सत्यो मिंदाहुती व्याहृतीश्च हु
त्वा आज्येन स्विष्टकृदादि शेषं समापयेत् • पृषदाज्यग्रहणप्रभृति प्रथमानुयाजचरणा
त्पूर्वं पृषदाज्यस्कंदने प्रायश्चित्तं कुर्यात् • ग्रहणप्रभृति यावत्प्रयाजचरणं वा सादन
प्रभृति प्रथमानुयाजचरणात्पूर्वं वा सादनप्रभृति यावत्प्रयाजचरणं वा • प्रायश्चित्तं
प्रयाजेभ्य ऊर्ध्वं स्कंने प्रायश्चित्तं नास्ति • पृषदाज्ये स्कन्ने कं संवाचमसेवांतवेदिनिपा
यतस्मिन्स्कन्ने शेषमवनयति • भूतिर्दध्ना घृतेनेति स्कन्नमनुमंत्रयते • भूतेप यस्वा
हेति पृषदाज्यग्रहण्यां लुप्यमाने हिरण्यं निधाय कंसादो संभृतं पृषदाज्ये पुनर्गृह्णीयात्
महीनां पयोसि विहितो त्वं नोन्नम अंतमङ्गत्यनुवर्त्तते • विश्वेषां देवानां तनूः विहितस्त्वमो २७

विश्वा
नमः • ऊर्ध्वा सम्यद्य • विहितो त्वं • म • हृदयमसि • विहितो मह्ः • एक भिषक् • मे • विहितो •
महत्यं च पृषदाज्यग्रहणामंत्रेषु पंचस्वनुवर्त्तयितव्य • अथवा • विहितो त्वं न्नो अंतमहत्य
चैव पंच ग्रहणानि गृह्णीयात् • हिरण्यमपो धृत्वाश्वमपघ्राप्य पृषदाज्यं यथास्थानं
सादयेत् • अश्वाघ्रातं हिरण्यं अध्वर्यवे दद्यात् • पृषदाज्यं पशुनाघ्रातं शुनाघ्रातं का
काद्युपहतं केशादिभिरुपहतं कीटादिभिर्दूषितं स्रवमं स्वच्च पृषदोज्यं स्यात् • यदि
पूर्वाग्निर्दक्षिणाग्निः पश्चिमाग्निरुत्तराग्निर्वा छिद्येतान्ययादि अग्निः पश्चौ छिद्ये यादि
रन्नेनेषु निर्मथिते षु वैश्वानर्यमाज्याने यमोदाधारेति हुत्वा व्याहृत्यादि अन्य धूपाहर
णादिकुर्यात् • यदि वपाहुतौ नीलवर्णो धू मोयद्युत्पद्येत प्रमोदा दक्षिणांदि
शं यदि गच्छेत धूमेवानावाग्र सव्यमावेष्टयेत् • एतेषु निमित्तेषु सर्वप्रायश्चित्तं

कुर्यात्. अथ पशुगर्भप्रायश्चित्तं वक्ष्यते. अजां वशायामालब्धायां अतिरात्रादौ स्त्रीपशा
वालब्धे वपोद्धरणकाले गर्भिणीति शोकायां अध्वर्युराह. गर्भमीक्षध्व इति. शमिता
२८ यदि गर्भं पश्येत्. तदाध्वर्युर्वस्त्रादिना वशां प्रच्छाद्य वपामुत्खिद्य वपामादाय
गत्वाश्च पार्श्वे आसादयेत्. वपाहोमकाले जातवेदो वपया इति मंत्रं परित्यज्य. सूर्यो देवो दि
विषद्भ्य इति वपां हुत्वा. मार्जनांते गर्भिणीं पशुमनुमंत्रयेत्. यस्यास्ते हरितो गर्भ इति. अ
थाष्टापूलकं हिरण्ययं उष्णीषं वासः सूक्ष्मकोशं बृहत्कोशं च संपाद्य हिरण्यं प्रक्षाल्य
वाससि उपरि उष्णीषेण विमथ्य सूक्ष्मकोशे निधाय वेणुवेत्रादिकृते महति को
श्री शे वस्त्रोष्णीषवेष्टितं कोशसहितं हिरण्यं निधाय वेद्यामासादयेत्. शमितर्हृदयमित्या
दि प्रैषमुक्त्वा तस्या प्रैषे तेन प्रत्यंचं गर्भमंतरेण सक्थिनी प्रतिनिर्वर्तयतादिति वदेत्.
तं च गर्भं योनिप्रदेशादाहृत्य प्रत्यंचं नीयमानमनुमंत्रयते. आभिवर्धानवर्त्यति. उल्बा
द्विमुच्यमानमनुमंत्रयते। धितेभिनश्रितकरिं इति. पशुश्रपणकाले गर्भं संदेद्रा २८

नपरिगृह्य अङ्गिरस्त्वक्ष्यन्ताग्निरेव प्रतिनपाति। मृगमिवाम्भो अपयेत्। हृदयादिभिः सह वा श्र
पयेत्। पच्यमानाद्गर्भात् प्राप्तो रसं क्षारयित्वा पृथङ्निदध्यात्। तेन पशोर्हृदयादीन्यभि
घार्यालंकृत्य पंचहोरात्रा पशुमुपसाद्य गर्भं तेनैव मार्गेण हृत्वा प्राग्ग्रीवं दक्षिणापादं द
क्षिणतः पंचहोरात्रासादयमनोतादि पशुना प्रवर्त्य दिशो कृत्वा वनस्पतियागात् सर्वजुह्वामु
पस्तीर्य मनोताप्रैषमकृत्वा गर्भावदानं कुर्यात्। विष्णवे शिपिविष्टायानुब्रूहीत्युक्त्वा ग
र्भस्य नाभ्याः पुरस्तादधः प्रथमं किंचिदवदाय नाभ्यामुपरिष्टाद्द्वितीयमवदाया
भिघार्य पशोः स्विष्टकृता सह स्विष्टकृतमुत्तरार्धादवदाय द्विरभिघारयति पश्विड्या
सह गर्भस्येडामवदायाभिघार्य वसाहोमहवन्यामुपस्तीर्य वसां गृहीत्वाभिघार्य ले
प्राण इत्यभिमृश्य ओरसत्यादिना लोडयित्वा क्रम्याश्राव्याह विष्णुशिपिविष्टं यजेति।
अर्धर्चे घृतं घृतपावान इति वसां कृत्वा वषट्कृते उरुद्रप्सो विश्वरूप इति मंत्रेण गर्भेडु

२९

त्वा विसृज्य शिरसि विहस्याहं इद्याचा। पूर्ववद्धिरोऽन्तु कुर्यात्। वसाहयस्य तंत्रेणवा दिग्घोमः
तदा वसाहोमशेषं पात्रांतरे धारयित्वा गर्भवसाग्रहणं कुर्यात्। गर्भहोमानंतरं दिग्घोमका
ले उभयं संमिश्य जुहुयात्। वनस्पतिस्विष्टकृता दिग्घोमं संप्राप्य गर्भं यथाहृत मुत्तरतः
प्रत्यानीय उत्तरवेद्या उत्तरार्धे प्राक्शिरसं निपात्य भस्मनाभिसंमृहति मही द्यौः पृथिवी च
न इति वरत्रा स्त्रीषिको गृह्य युतो हिरण्यम ध्वर्यवे दद्यात्। गर्भस्यात्विसृज्य चेत्स्विष्टकृद्दि
ग्वसाहोमान्कुर्यात्। अस्विष्टाद्दित्यां स्विष्टकृद्दिग्वसाहोमान्नकुर्यात्। तदा वसामा
ज्येन समुदायुत्य मध्यमेन पलाशपर्णेनांतः परिधि निनयेत्। गर्भं छित्वेद्द्वादश पुलकव
हिरण्यं गर्भं छित्वेषोडश पुलकं हिरण्यं वाससा वेष्ट्य उष्णीषेण वियथ्य वरत्रकोशेनि
धाय महति कोशे निदध्यात्। गर्भं छित्वेव कुलेचो आवर्तनवर्तयवितेति न दमतिक
शाम्नितिमंत्रद्वयस्य प्रतिगर्भमावृत्तिः गर्भं छित्वेव कुलेवा सर्वेभ्यो छित्वेरवदायदिराम्नि २९

घार्यं सकृदेव होमः वसाहोमोपि गर्भं छित्वेव कुलेवा सकृदेव। एवं पशुगर्भप्रायश्चित्तं कु
र्यात्। अयनपश्वोर्माघमासे धनिष्ठार्धादिनंतरमुत्तरायणं। श्रावणे अर्धाश्लेषानंतरं दक्षि
णायनं। अयनानंतरमेव पश्वोर्मुख्यः कालः। सर्वमुत्तरायणं उत्तरायणपशोर्गौणः का मध्य
लः। सर्वमपि दक्षिणायनं दक्षिणायनपशोर्गौणः कालः। संवत्सरपशुपक्षे उत्तरायण
संवत्सरपशोर्मुख्यः कालः। पुनरासंवत्सराद्गौणकालः। अनापदि गौणकाले कुर्वन्वैश्वा
नरप्रायश्चित्तेष्टिपूर्वकं पशुं कुर्यात्। अनापदि गौणकालं कुर्वन्प्रायश्चित्तं न कुर्यात्। गौण
कालेप्यतिक्रांते प्रायश्चित्तं वैश्वानरेष्टिं कृत्वा अतिपन्नं पशुं कुर्यात्। आषण्मासात्पशोर
करणे आग्नेयं पथिकृतं अष्टाकपालमित्यादिका ममाग्निहोत्रातिपाते दनोक्तां चतुर्हविष
मिष्टिं कृत्वा प्रायश्चित्तं कृत्वा अतिपन्नं पशुं कुर्यात्। आसंवत्सरात्पशोरकरणे ग्नये पथ
मानायाष्टाकपालमित्यादिकामाग्निहोत्रातिपादनोक्तां सप्तहविषमिष्टिं प्रायश्चि

संक्रान्तातिपन्नंपशुंकुर्यात्।पशुंकर्तुंद्रव्याभावादसमर्थश्चेद्वैश्वानरीमिष्टिंपशुप्रत्याम्ना
यत्वेनकुर्यात्।तथाचमनुः।कृतानांपशुसोमानांनिष्कृत्यर्थमसंभवे।इष्टिंवैश्वानरींनि
त्यंनिर्वपेदब्दपर्ययेइति। ।इतिप्रायश्चित्तप्रदीपेआग्रयणाद्यंनामचतुर्थंप्रकरणं।।।
श्रीयज्ञनारायणार्पणमस्तु श्रीः ७ श्रीः ७ श्रीः ७ श्रीः